Shri Raghunatha Temple MSS. Library,
JAMMU ६२२३

२०९

...tle रघुवंशः

Author महाकविः कालिदासः

Extent ६१ पत्र Age

Subject काव्य

२०९ख

रघुवंश आदर्श

पन्ना ८१

खण्डशः

६५

ॐ श्रीगणेशाय नमः ॐ अथ तस्य विवाहकौतुके ललितं बिभ्रत एव पार्थिवः वसुधामपि
हस्तगामिनीमकरोदिंदुमतीमिवापरां॥१॥ दुरितैरपि कर्तुमात्मसात्प्रयतंते नृपसूनु।
वो हि यत् तदुपस्थितमग्रहीदजः पितुराज्ञेति न भोगतृष्णया॥२॥ अनुभूय वशिष्ठ।
संभृतैः सलिलैस्तेन महाभिषेचनम् विशदोच्छ्वसितेन मेदिनी कथयामास कृतार्थ
तामिव॥३॥ स बभूव दुरासदः परैः गुरुणाथर्वविदा कृतक्रियः पवनाग्निसमागमो
ह्ययं सहितं ब्रह्म यदस्त्रतेजसा॥४॥ रघुमेव निवृत्तयौवनं तममन्यंत नरेश्वरं प्रजाः स हि
तस्य न केवलां श्रियं प्रतिपेदे सकलान्गुणानपि॥५॥ अधिकं शुशुभे शुभंयुना द्वितयेन।
द्वयमेव संगतम् पदमृद्धमजेन पैतृकं विनयेनास्य नवं च यौवनं॥६॥ सदयं बुभुजे महाभुजः

॥ रघुवंश ॥

नं ॥ ५ [illegible]

रघेनतादिषि: वेदज्ञाः खु:

सप्तसामोपगीतं त्वां सप्तार्णवजलेशयं सप्तार्चिर्मुखमाचख्युः सप्तलोकैकसंश्रयं २३

चतुर्वर्गफलं ज्ञानं कालावस्था चतुर्युगाः चतुर्वर्णमयो लोकस्त्वत्तः सर्वं चतुर्मुखात् २४

2 अभ्यासनिग्रहीतेन चेतसा हृदयाश्रयं ज्योतिर्मयं विचिन्वन्ति योगिनस्त्वां विमुक्तये २५

अजस्याग्रहणो जन्मनिरीहस्य हतद्विषः स्वपतो जागरूकस्य याथात्म्यं वेद कस्तव च २६

शब्दादीन्विषयान्भोक्तुं चरितुं दुश्चरं तपः पर्याप्तोसि प्रजाः पातुमौदासीन्येन वर्तितुं २७ दासीन्येन वर्तितुं

बहुधाप्यागमैर्भिन्नाः पंथानः सिद्धिहेतवः त्वय्येव निपतन्त्योघा जाह्नवीया इवार्णवे २८

त्वय्यावेशितचित्तानां त्वत्समर्पितकर्मणां गतिस्त्वं वीतरागाणामभूयः संनिवृत्तये २९

प्रत्यक्षोऽप्यपरिच्छेद्यो मह्यादिर्महिमा तव आप्तवागनुमानाभ्यां साध्यं त्वां प्रति का कथा केवलं

स्मरणेनापि पुनासि पुरुषं यदा अनेन वृत्तयः शेषा निवेदितफलास्त्वयि ३०

शिवस्तवानि रोगाणी

वामदेवादयः

अथ्यर्घ्यं गादयस्तस्य संतानकादिशः ॥ आदेभिरे यतात्मानस्तु श्रीयामश्च ये द्विजः ५

तस्मिन्नवसरे देवा योल्लसत्पस्तुताहरिं अभिजग्मुर्निदाघार्ता ःछायाद्रुममिवाध्वगाः ६
योगनिद्राख्ये ... मध्यस्थायास गः

नेचभाग्रुह्य दत्वं तं बुबुधे चादिपुरुषः अथ्यातपो भविष्यंता कार्यसिद्धिर्हि सन्तताः ७
उदुरिम

भोगिभोगास्तमय्यीनं दृष्टुं स्रग्दिवौकसः तत्क्षणामंडलोदर्चिर्भ रविद्योतितेविपद्म ८ विशेषेण ... दर्शन
यो ...

श्रियः पद्मनिषण्णायाः क्षौमांतरितमेखले अंके निदिदिशं चरणमा स्तीर्णकरपल्लवे ९ चे = ...
यामिन्या ... लक्ष्मी ... ... मस्तवंदमानं =

प्रबुद्धपुंडरीकाक्षं वालातपनिभांशुकं दिवि सस्प्रान्मङ्गलमिवप्रारंभसुखदर्शनं १०
प्रभानुरंजितःश्रीवत्सोपि तु

प्रभानुलिप्तश्रीवत्सं लक्ष्मीविभ्रमदर्पणं कौस्तुभास्यमपांसारं विभ्राणं बृहदोरसा ११
त्यादि त हेमा

बाहुभिर्विटपाकारैर्दिव्याभरणभूषितैः आविर्भूतं पयोमध्यात्पारिजातमिवापरं १२

दैत्यस्त्रीगंडलेखानां मदरागविलोपिभिः हेतिभिश्चेतनावद्भिरुदीरितजयस्वनम् १३
स्वामुधैः

मुक्तः शोषणागेन सह
विरोधेनेति

१ २.वं.८. रुक्षस्पर्शो विरोधेन कुलिशव्रणलक्ष्मणा उपस्थितं प्रांजलिना विनीतेन गरुत्मता ध

योगनिद्रान्तविशदैः पावनैरवलोकनैः भृग्वादीननुगृह्णन्तं सौखशायनिकानृषीन् १४

३ प्रणिपत्य सुरास्तस्मै शमयित्रे सुरद्विषां अथैनं तुष्टुवुः स्तुत्यमवाङ्मनसगोचरं १५

नमो विश्वसृजे पूर्वं विश्वं तदनु बिभ्रते अथ विश्वस्य संहर्त्रे तुभ्यं त्रेधास्थितात्मने १६

एकः कारणतां तासां नाम वस्थाप्रतिपद्यसे नानात्वं रागसंयोगात् स्फटिकस्येव ते स्थितं १७

वं रसान्तराण्येकरसं यथा दिव्यं पयोऽश्नुते देशे देशे गुणेष्वेवमवस्थास्त्वमविक्रियः १९

अमेयो मितलोकस्त्वमनर्थी प्रार्थनावहः अजितो जिष्णुरत्यन्तमव्यक्तो व्यक्तकारणं २०

हृदयस्थमनासन्नमकामं त्वां तपस्विनं दयालुमनघस्पृष्टं पुराणमजरं विदुः २१

सर्वज्ञस्त्वमविज्ञातः सर्वयोनिस्त्वमात्मभूः सर्वप्रभुरनीशस्त्वमेकस्त्वं सर्वरूपभाक् २२

ॐ श्रीगणेशाय नमः। अथ प्रजानामधिपः प्रभाते जाया प्र-
तिग्राहितगंधमाल्यां ॥ वनाय पीतप्रतिबद्धवत्सां यशोधनो
धेनुमृषेर्मुमोच ॥१॥ तस्याः खुरन्यासपवित्रपांसुमपांसुलानां धुरि
कीर्तनीया मार्गं मनुष्येश्वरधर्मपत्नी श्रुतेरिवार्थं स्मृतिरन्व-
गच्छत् ॥२॥ निवर्त्य राजा दयितां दयालुस्तां सौरभेयीं सुरभि-
र्यशोभिः पयोधरीभूतचतुःसमुद्रां जुगोप गोरूपधरामिवो-
र्वीम् ॥३॥ व्रताय तेनानुचरेण धेनोर्न्यषेधि शेषोऽप्यनुयायिवर्गः
रो६= न चान्यतस्तस्य शरीररक्षा स्ववीर्यगुप्ता हि मनोः प्रसूतिः ॥४॥
आस्वादवद्भिः कवलैस्तृणानां कंडूयनैर्दंशनिवारणैश्च ॥ अ-
व्याहतस्वैरगतैस्स तस्याः सम्राट् समाराधनतत्परोऽभूत् ॥५॥

६

र॰वं॰ द्वि॰

स्थितः स्थितामुच्चलितः प्रयातां निषीदुषीमासनबंधधीरः जला
भिलाषी जलमाददानां छायेव तां भूपतिरन्वगच्छत् ६ सन्यस्त
चिह्नामपि राजलक्ष्मीं तेजोविशेषानुमितां दधानः आसीदना
विष्कृतदानराजिरंतर्मदावस्थ इव द्विपेंद्रः ७ लताप्रतानोद्ग्रथि
तैः स केशैरधिज्यधन्वा विचचार दावं रक्षापदेशान्मुनिहो
मधेनोर्वन्यान्विनेष्यन्निव दुष्टसत्वान् ८ विसृष्टपार्श्वानुच
रस्य तस्य पार्श्वद्रुमाः पाशभृता समस्य उदीरयामासुरिवोन्मदाना
मालोकशब्दं वयसां विरावैः ९ मरुत्प्रयुक्ताश्च मरुत्सखाभं त
मर्च्यमारादभिवर्तमानं अवाकिरन्बाललताः प्रसूनैराचा
रलाजैरिव पौरकन्याः १० धनुर्भृतोप्यस्य दयार्द्रभावमाख्या
तमंतःकरणैर्विशंकैः विलोकयंत्यो वपुरापुरक्ष्णां प्रकामविस्तारफलं हरिण्यः ११ सकीच

ञ्जेषु यशः स्वमुच्चैरुद्गीयमानं वनदेवताभिः ॥१२॥ पृक्तस्तुषारैर्गिरिनिर्झराणामनोकहा
कम्पितपुष्पगन्धी तमातपक्लान्तमनातपत्रमाचारपूतं पवनः सिषेवे ॥१३॥ शशाम
वृष्ट्यापि विना दवाग्निरासीद्विशेषा फलपुष्पवृद्धिः ऊनं न सत्त्वेष्वधिको बबा
धे तस्मिन्वनं गोप्तरि गाहमाने ॥१४॥ संचारपूतानि दिगन्तराणि कृत्वा दिनान्ते
निलयाय गन्तुं प्रचक्रमे पल्लवरागताम्रा प्रभा पतङ्गस्य मुनेश्च धेनुः ॥
१५ तां देवतापित्रतिथिक्रियार्थामन्वग्ययौ मध्यमलोकपालः बभौ च सा
तेन सतां मतेन श्रद्धेव साक्षाद्विधिनोपपन्ना ॥१६॥ स पल्वलोत्तीर्णवरा
हयूथान्यावासवृक्षोन्मुखबर्हिणानि ययौ मृगाध्यासितशाद्वलानि ।
श्यामायमानानि वनानि पश्यन् ॥१७॥ आपीनभारोद्वहनप्रयत्नाद्गृष्टिः

धुरिः नरेंद्रः स्व इमौ तपोवनात् इति विषयं अलंचक्रतुः कीदृशाभ्यां गताभ्यां अभ्यां आपीनभारोद्वहनप्रयत्नाद् गृष्टिर्गुरुत्वा
दंचिताभ्यां =

गताभ्यां॥ हि॰

स्थूलत्वात् दिलीपस्य वपुः द्वितीयः

र॰ वं॰ नै॰ ११ गुरुत्वाद्वपुषो नरेंद्रः उभावलंचक्रतुरंचिताभ्यां तपोवनावृत्तिपथं गताभ्यां
॥१८॥ वसिष्ठधेनोरनुयायिनं तमावर्तमानं वनिता वनान्तात् पपौ निमेषालस
पक्ष्मपंक्तिरुपोषिताभ्यामिव लोचनाभ्यां ॥१९॥ पुरस्कृता वर्त्मनि पार्थिवेन
प्रत्युद्गता पार्थिवधर्मपत्न्या तदन्तरे सा विरराज धेनुर्दिनक्षपामध्यगतेव
सं॰ संध्या ॥२०॥ प्रदक्षिणीकृत्य पयस्विनीं तां सुदक्षिणा साक्षतपात्रहस्ता प्रणम्य
चानर्च विशालमस्याः शृंगान्तरं द्वारमिवार्थसिद्धेः ॥२१॥ वत्सोत्सुकापि स्तिमि
तासपर्यां प्रत्यग्रहीत्सेति ननन्दतुस्तौ भक्त्योपपन्नेषु हि तद्विधानां प्रसादचिह्ना
नि पुरःफलानि ॥२२॥ गुरोः सदारस्य निपीड्य पादौ समाप्य सांध्यं च विधिं दिलीपः

मत्यासन्नकलानि निकट भवंति फलानि भवंति

स

समाप्य कृत्वा

अनुष्ठानं

उ

दोहावसाने पुनरेव दोग्ध्रीं भेजे भुजोच्छिन्नरिपुर्निषण्णाम् ॥२३॥ ताम
न्तिकन्यस्तबलिप्रदीपामन्वास्य गोप्ता गृहिणीसहायः । क्रमेण
सुप्तामनुसंविवेश सुप्तोत्थितां प्रातरनूदतिष्ठत् ॥२४॥ इत्थं व्र
तं धारयतः प्रजार्थं समं महिष्या महनीयकीर्तेः । सप्त व्यतीयुस्त्रि
गुणानि तस्य दिनानि दीनोद्धरणोचितस्य ॥२५॥ अन्येद्यु
रात्मानुचरस्य भावं जिज्ञासमाना मुनिहोमधेनुः । गंगाप्र
पातान्तविरूढशष्पं गौरीगुरोर्गह्वरमाविवेश ॥२६॥ सा दुष्प्र
धर्षा मनसापि हिंस्रैरित्यद्रिशोभाप्रहितेक्षणेन ॥ अलक्षिता
भ्युत्पतनो नृपेण प्रसह्य सिंहः किल तां चकर्ष ॥२७॥ तदीय
माक्रन्दितमार्तसाधोर्गुहानिबद्धप्रतिशब्ददीर्घम् ॥ रश्मि

द्वि

र॰वं॰अ॰
१२

12

च्छिवादाय नगेन्द्रसक्तां निवर्तयामास नृपस्य दृष्टिम् ॥२८॥ स
पाटलायां गवि तस्थिवांसं धनुर्धरः केसरिणं ददर्श ॥ अ
धित्यकायामिव धातुमय्यां लोध्रद्रुमं सानुमतः प्रफुल्लम् ॥२९॥ त
तो मृगेन्द्रस्य मृगेन्द्रगामी वधाय वध्यस्य शरं शरण्यः ॥ जा
ताभिषङ्गो नृपतिर्निषङ्गादुद्धर्तुमैच्छत्प्रसभोद्धृतारिः ॥३०॥
वामेतरस्तस्य करः प्रहर्तुर्नखप्रभाभूषितकङ्कपत्रे ॥ सक्ता
ङ्गुलिस्सायकपुङ्ख एव चित्रार्पितारम्भ इवावतस्थे ॥३१॥ बा
हुप्रतिष्टम्भविवृद्धमन्युरभ्यर्णमागस्कृतमस्पृशद्भिः ॥ राज्ञा

णि

स्वतेजोभिरदह्यमानान्तर्भोगीव मंत्रौषधिरुद्धवीर्यः ॥३२॥ तमार्यगृह्यं निगृ-
हीतधेनुर्मनुष्यवाचा मनुवंशकेतुं विस्मापयन्विस्मितमात्मवृत्तौ भया-
त्तसिंहं निजगाद सिंहः ॥३३॥ अलं महीपाल तव श्रमेण प्रयुक्तमप्यस्त्र-
मितो वृथा स्यात् । न पादपोन्मूलनशक्ति रंहः शिलोच्चये मूर्छति मा-
रुतस्य ॥३४॥ कैलासगौरं वृषमारुरुक्षोः पादार्पणानुग्रहपूतपृष्ठं । अवे-
हि मां किंकरमष्टमूर्त्तेः कुम्भोदरं नाम निकुंभमित्रं ॥३५॥ अमुं पुरः पश्य-
सि देवदारुं पुत्रीकृतोसौ वृषभध्वजेन । यो हेमकुंभस्तननिःसृता-
नां स्कंदस्य मातुः पयसां रसज्ञः ॥३६॥ कंडूयमानेन कटं कदाचिद्वन्यद्वि-

द्वि॰
र॰ वे॰ मा॰
१२

13

पैनोस्मि पिता त्वगास्य ॥ श्रुत्वेन मद्रे स्तनयाश्रशोचसेनान्यमालीढमिवाश्रु-
राद्रैः ॥२७॥ तदा प्रभृत्येव वनं हिमालयं त्रासार्थमस्मिन्नहमद्रिजस्तो ॥ व्या-
पारितः शूलभृता विधाय सिंहत्वमंकागतसत्वप्रवृत्तिः ॥२८॥ तस्यालमेषा
क्षुधितस्य तृप्त्यै प्रदिष्टकाला परमेश्वरेण ॥ उपस्थिता शोणितपारणा मे सु-
रद्विषश्चान्द्रमसी सुधेव ॥३०॥ स त्वं निवर्तस्व विहाय लज्जां गुरोर्भवान्दर्शि-
तशिष्यभक्तिः ॥ शस्त्रेण रक्ष्यं यदशक्यरक्ष्यं न तद्यशः शस्त्रभृतां क्षिणोति ॥
॥३१॥ इति प्रगल्भं पुरुषाधिराजो मृगाधिराजस्य वचो निशम्य प्रत्याहतास्त्रो
गिरिशप्रभावादात्मन्यवज्ञां शिथिलीचकार ॥३२॥ प्रत्यब्रवीच्चैनमि-

विनाशरक्ष्यः स्वयमव्ययेन ॥५६॥ किमप्यहिंस्यस्तव चेन्मतोहं यशःशरीरे
भव मे दयालुः एकांतविध्वंसिषु मद्विधानां पिंडेष्वनास्था खलु भौतिके
षु ॥ संबंधमाभाषणपूर्वमाहुर्वृत्तः स नौ संगतयोर्वनांते तद्भूतनाथानुग ना
र्हसि त्वं संबंधिनो मे प्रणयं विहंतुं ॥ तथेति गामुक्तवते दिलीपः सद्यः प्रति
ष्टंभविमुक्तबाहुः सन्यस्तशस्त्रो हरये स्वदेहमुपानयत्पिंडमिवामिषस्य
॥५९॥ तस्मिन्क्षणे पालयितुः प्रजानामुत्पश्यतः सिंहनिपातमुग्रं
अवाङ्मुखस्योपरि पुष्पवृष्टिः पपात विद्याधरहस्तमुक्ता ॥६०॥ उत्ति
ष्ठ वत्सेत्यमृतायमानं वचो निशम्योत्थितमुत्थितः सन् ॥ ददर्श राजा जनं

अमृतरवं आवरती ति

उत्थितं त्यि

र॰ वं
टि॰ १६
16

नीमिवसौगामं प्रयन्तं प्रसह्य सिंहः॥ ६१॥ तं विस्मितं धेनुरुवाच साधो
मायां मयोद्भाव्य परीक्षितोसि ऋषिप्रभावान्मयि नांतकोपि प्रभुः
प्रहर्तुं किमुतान्यहिंस्राः॥ ६२॥ भक्त्या गुरौ मय्यनुकंपया च प्रीता
(उत्पन्नानां) (हेतुं) (कामदोग्ध्रीं) (मां अवेहि)
स्मि ते पुत्र वरं वृणीष्व न केवलानां पयसां प्रसूतिमवेहि मां कामदुघां प्रस
(धेनुकथितां नरः हस्तौ दिलीपः)
न्नां॥ ६३॥ ततः समानीय समानितार्थी हस्तौ स्वहस्तार्जितवीर
शब्दः वंशस्य कर्तारमनंतकीर्तिं सुदक्षिणायां तनयं ययाचे॥ ६४॥
संतानकामाय तथेति कामं राज्ञे प्रतिश्रुत्य पयस्विनी सा॥ दुग्ध्वा
पयः पत्रपुटे मदीयं पुत्रोपभुंक्ष्वेति तमादिदेश॥ ६५॥
दी

प्रसादस्य कार्यं प्रहर्षः कार्यमिदं तस्य चिह्नानि मुखरागादीनि तैः अनुमितं ज्ञातमिति विषयीकृतं तस्याः प्रसादं =५

कथितं कथनमिव पुनरुक्तया शयाया वाचा =५

वत्सस्य होमार्थविधेश्च शेषमृषेरनुज्ञामधिगम्य मातः । ऊधस्यमिच्छा-
मि तवोपभोक्तुं षष्ठांशमुर्व्या इव रक्षितायाः ॥६७॥ इत्थं क्षितीशेन वसिष्ठधेनुर्वि-
ज्ञापिता प्रीततरा बभूव । तदन्विता हैमवताच्च कुक्षेः प्रत्याययावाश्रममश्र-
मेण ॥६८॥ तस्याः प्रसन्नेन्दुमुखः प्रसादं गुरुर्नृपाणां गुरवे निवेद्य । प्रहर्षचि-
ह्नानुमितं प्रियायै शशंस वाचा पुनरुक्तयेव ॥६९॥ स नन्दिनीस्तन्यमनिंदि-
तात्मा सद्वत्सलो वत्सहुतावशेषं । पपौ वसिष्ठेन कृताभ्यनुज्ञः शुभ्रं यशो मूर्त-
तमिवातितृष्णः ॥७०॥ प्रातर्यथोक्तव्रतपारणांते प्रास्थानिकं स्वस्त्ययनं प्रयुज्य ।
तौ दंपती स्वां प्रति राजधानीं प्रस्थापयामास वशी वसिष्ठः ॥७१॥ प्रदक्षिणी-

मुखरागादेः चिह्नात् कारणात् प्रहर्षस्य ... प्रसादं = पश्चात् =

हुतावशेषं =

अनिंदितः सम्यक् आत्मा यस्य सः =

र. वं. टि.
१६

रूत्यहुताशनं न तस्य होतारमहं यतीच । ये हि सवत्सा चनरपः प्रतस्थे स ।
न्यंगलो दग्गुतरय भाव: ७२ । श्रोत्राभिरामध्वनिनारथेन स यमध
त्तीस हि तः स हि स्तु: य यावनद्द्वातस्व खेनमार्गं स्वे ने व ह रौन मनो प्रजा ध्येवतद्वे तेन कोविता लिङ्गगा लि यस्सते =

१६

२५ रथेन । ७३ । तमा हितौत्सुक्य मदर्शनेन प्रजा: प्रजार्थव्रत कर्षितांग
ने त्रैः पपुस्त्रिप्तिमनाप्नुवद्भिर्नवोदयं नाथमिवौषधीनाम् । ७४ ।।
पुरंदरश्रीः पुरमुत्पताकं प्रविश्य पौरैरभिनंद्यमानः भुजे भुजंगेन्द्र
समानसारे भूयः स भूमेर्धुरमाससंज । ७५ । अथ नयनैः समुत्थं ज्योतिरे
त्रेरिव द्यौः सुरसरिदिव तेजो वह्निनिष्ठ्यूतमैशं । नरपतिकुलभूत्यैगर्भ

सादरस्यया
स्याजयाविलोक
यामासु: = ३३ स्वध्वं
यस =

दहिनाड्दमनेन्दोतं नाभिव संयी ते जे प्व =

अथपुरप्रवेशानंतरं = २

दिलीपस्य=३

कोऽ प्सितंमोदनेतना दि
ऽस्यां निधौ सा कौमुदीऽन्तस्त व तीलक्ष्य दृष्टा
ध्यिः नस्या: मात्रंम रूपं=४

मोयत्तराज्ञी मुहुरभिरंभि निविशे लोकपालानुभावैः ॥७६॥ इति श्रीर ।
घुवंशे महाकाव्ये कविकालिदासकृतौ सञ्जीविन्याख्यव्याख्यायां नन्दिनीवरप्रदा ।
नोनाम द्वितीयः सर्गः ॥ अथेप्सितं भर्तुरुपस्थितोदयं सखीज
नोद्वीक्ष्यकौमुदीमुखं । निदानमिक्ष्वाकुकुलस्य संततेः सुदक्षिणा
दौहृदलक्षणं दधौ ॥१॥ ततो विशांपत्युरनेत्रसन्ततेर्मनोरथं किंचि ।
दिवोदयोन्मुखम् अतन्त्रसोहार्ददसस्य दोहदं प्रियायवेदं प्रकृति
प्रियंवदा ॥२॥ शरीरसादादसमग्रभूषणा मुखेन सालक्ष्यत लो
ध्रपाण्डुना तनुप्रकाशेन विचेयतारका प्रभातकल्पा शशिनेव
र्वरी ॥३॥ मृत्सुरभे नसाके तकपत्रपाण्डुना हृशागयघ्हिः पारि

प्राप्तः उदयो का लोच
सूरः=
ऽविच्छिन्ने=४

गर्भाधानानंतरं=२
मनोरथरूपं=२
सखीजनस्य दृष्टिशाला निनिनेत्रा
कौमुदी मुखं कौमुदा: चंद्रि
का या: मु खरूपं मासु
भाव रूपं=

दृशास्यादिसमाने क्षम
नोयस्या: सा=
उपलादिता=वि
उपलक्षिता=

एनवान्=५
प्रातः एवप्रियतातारकायस्यां सा:=२

मृत्सुरभिक्षितीश्वरो रहस्युपाघ्राय न तृप्तिमाययौ

२

र॰वं॰टि॰ १८

मेयमक्षयाणा स्थिताल्पतारां करुणेन्दुमण्डलां विभातकल्पां रजनीं व्यडं
बयत् ४ ~~नतोनिविद्यांप्रतु...~~ तदाननं मृत्सुरभिक्षि
कालेवनस्थः समग्रा वनतस्माधयोके करीव सिक्तं पृषतैः पयोमुचां।

श्री भावसाने अस्सरः

शुचिव्यपाये वनराजिपल्वलं ५ दिवं मरुत्वानिव भोक्ष्यते महीं दिग
हित न्तविश्रांतरथो हि तत्सुतः अतोभिलाषे प्रथमं तथाविधे मनो बबंधा
न्यरसान्विलंघ्य सा ६ न मे ह्रिया शंसति किंचिदीप्सितं स्पृहावती
वस्तुषु केषु मागधी ७ इति स्म पृच्छत्यनुवेलमादृतः प्रियासखीरुत्त
रकोशलेश्वरः ८ उपेत्य सा दोहददुःखशीलतां यदेव वव्रे तदपश्यदाहृतं ९

विधुर ता

न हीष्टमस्य त्रिदिवेपि भूपतेरभूदनासाद्यमधिज्यधन्वनः ॥६॥ दिनेषु ग
च्छत्सु नितान्तपीवरं तदीयमानीलमुखं स्तनद्वयं ॥ तिरश्चकार भ्र
मराभिलीनयोः सुजातयोः पङ्कजकोशयोः श्रियं ॥७॥ क्रमेण निस्ती
र्य च दोहदव्यथां प्रचीयमानावयवा रराज सा ॥ पुराणपत्रापगमा
दनन्तरं लतेव संनद्धमनोज्ञपल्लवा ॥८॥ निधानगर्भामिव साग
राम्बरां शमीमिवाभ्यन्तरलीनपावकाम् ॥ नदीमिवान्तःसलिलां
सरस्वतीं नृपः ससत्वां महिषीममन्यत ॥९॥ प्रियानुरागस्य मनःसमुन्न
तेर्भुजार्जितानां च दिगन्तसंपदाम् ॥ यथाक्रमं पुंसवनादिकाः क्रि

र.वं. टि.
१८
18

धृतेस्तु धीरः सहशीर्षयत्नः ॥ स रहदेहमाश्रितगर्भगौरवात्प्रयत्नमुक्ता स
कास्तनयाग्रहागतः ॥ तयोपचाराञ्जलिखिन्नहस्तया ननन्द पारिप्ल
वनेत्रयान्वयः ॥१३॥ कुमारभृत्याकुशलैरनुष्ठिते भिषग्भिराप्तैरथ
गर्भभर्मणि ॥ पतिः प्रतीतः प्रसवोन्मुखीं प्रियां ददर्श कालादि
वमभ्रितामिव ॥१४॥ ग्रहैस्ततः पञ्चभिरुच्चसंश्रयैरसूर्यगैः सूचि
तभाग्यसंपदम् ॥ असूत पुत्रं समये शचीसमा त्रिसाधना शक्तिरिवा
र्थमक्षयम् ॥१५॥ दिशः प्रसेदुर्मरुतो ववुः शिवाः प्रदक्षिणार्चिर्हविरग्निराद
दे ॥ बभूव सर्वं शुभशंसि तत्क्षणं भवो हि लोकाभ्युदयाय तादृशाम् ॥१६॥

७

सूतिकागृहेशय्यायाः शोभनजन्मनः नैसर्गिकेन तेजसा अर्द्धरात्रेदीपाः शीघ्रं

अरिष्टशय्यां परितो विसारिणा सुजन्मनस्तस्य निजेन तेजसा। निशीथ-
दीपाः सहसा हतत्विषो बभूवुरालेख्यसमर्पिता इव ॥१७॥ जनाय शुद्धा-
न्तचराय शंसते कुमारजन्मामृतसम्मिताक्षरं। अदेयमासीत्त्रयमेव
भूपतेः शशिप्रभं छत्रमुभे च चामरे ॥१८॥ निवातपद्मस्तिमितेन चक्षुषा नृ-
पस्य कान्तं पिबतः सुताननं। महोदधेः पूर इवेन्दुदर्शनाद्गुरुः प्रह-
र्षः प्रबभूव नात्मनि ॥१९॥ स वीक्ष्य पुत्रस्य चिरात्पिता मुखं निधान-
कुम्भस्य युवेव दुर्गतः। मुदा शरीरे प्रबभूव नात्मनः पयोधिरिन्दूदया-
न्मूर्छितो यथा ॥ स जातकर्मण्यखिले तपस्विना तपोवनादेत्य पुरो-

र.वं.त.

दिलीपसूनुर्मणिराकरोद्भवः प्रयुक्तसंस्कार इवाधिकं बभौ ॥२१॥ सुखश्रवा
मंगलतूर्यनिस्वनाः प्रमोदनृत्यैः सह वारयोषितां न केवलं सद्मनि मागधी
पतेः पथि व्यजृम्भन्त दिवौकसामपि ॥२२॥ न संयतस्तस्य बभूव रक्षितुर्विसर्ज
येद्यं सुतजन्महर्षितः ऋणाभिधानात्स्वयमेव केवलं तदा पितॄणां
मुमुचे स बन्धनात् ॥२३॥ श्रुतस्य यायादयमन्तमर्भकस्तथा परेषां युधि चेति
पार्थिवः अवेक्ष्य धातोर्गमनार्थमर्थविच्चकार नाम्ना रघुमात्मसं
भवम् ॥२४॥ पितुः प्रयत्नात्स समग्रसंपदः शुभैः शरीरावयवैर्दिने दिने
पुपोष वृद्धिं हरिदश्वदीधितेरनुप्रवेशादिव बालचन्द्रमाः ॥२५॥

स्कन्दस्कन्दनौ ताभ्यां सदृशः तेन =
ताव समौ तेन ताभ्यां समौ =

पार्वती

उमावृषाङ्कौ शरजन्मना यथा यथा जयन्तेन शचीपुरंदरौ तथा नृपः सा च सु-
तेन मागधी ननन्दतुस्तत्सदृशेन तत्समौ ॥२६॥ रथाङ्गनाम्नोरिव भावबन्ध-
नं बभूव यत्प्रेम परस्पराश्रयं विभक्तमप्येकसुतेन तत्तयोः परस्परस्यो-
परि पर्यचीयत ॥२७॥ उवाच धात्र्या प्रथमोदितं वचो ययौ तदीयामवल-
म्ब्य चाङ्गुलिं ॥ अभूच्च नम्रः प्रणिपातशिक्षया पितुर्मुदं तेन ततान
सोऽर्भकः ॥२८॥ तमङ्कमारोप्य शरीरयोगजैः सुखैर्निषिञ्चन्तमिवामृतं
त्वचि ॥ उपान्तसम्मीलितलोचनो नृपश्चिरं सुतस्पर्शरसज्ञतां ययौ ॥
॥२९॥ अमंस्त चानेन परार्ध्यजन्मना स्थितेरभेत्ता स्थितिमन्तमन्वयं स्वमूर्तिभेदेन गुणाग्र

वर्णाश्रममर्यादा दिल
काश्रमता है

स्थितिमन्तं मेने

र. वं. टि.
द्वि. २.

20

स वृत्तचूडश्चलकाकपक्षकैरमात्यपुत्रैः सवयोभिरन्वितः लिपेर्यथावद्ग्रहणेन
वाङ्मयं नदीमुखेनेव समुद्रमाविशत् ॥ २८ ॥ अथोपनीतं विधिवद्विपश्चितो
विनिन्युरेनं गुरवो गुरुप्रियं अवंध्ययत्नाश्च बभूवुरत्र ते क्रिया हि वस्तूप
हिता प्रसीदति ॥ २९ ॥ धियः समग्रैः स गुणैरुदारधीः क्रमाच्चतस्रश्चतुरर्णवोपमाः
ततार विद्याः पवनातिपातिभिर्दिशो हरिद्भिर्हरितामिवेश्वरः ॥ ३० ॥ त्वचं स मेध्यां परिधाय रौर
वीमशिक्षतास्त्रं पितुरेव मंत्रवित् न केवलं तद्गुरुरेकपार्थिवः क्षिताव
भूदेकधनुर्धरोपि सः ॥ ३१ ॥ महोक्षतां वत्सतरः स्पृशन्निव द्विपेन्द्रभावं कलभः श्रयन्निव रघुः क्रमाद्यौवनभिन्नशै
शवः पुपोष गांभीर्यमनोहरं वपुः ॥ ३२ ॥ अथास्य गोदानविधेरनंतरं विवाहदीक्षां निरवर्तय

यद्गुरुः नरेंद्रकन्यास्तमवाप्यसत्पतिंतमोनुदंदक्षसुताइवाबभुः ३६ युवायुग-
व्यायतबाहुरंसलः कपाटवक्षाः परिणद्धकंधरः वपुःप्रकर्षादजयद्गुरुंरघु-
स्तथापिनीचैर्विनयाददृश्यत ३७ ततः प्रजानांचिरमात्मनाधृतां
नितांतगुर्वींलघयिष्यताधुरम् निसर्गसंस्कारविनीतइत्यसौनृ-
पेणचक्रेयुवराजशब्दभाक् ३८ नरेंद्रमूलायतनादनंतरंतदास्पदंश्री-
र्युवराजसंज्ञितम् अगच्छदंशेनगुणाभिलाषिणीनवावतारंकमला-
दिवोत्पलम् ३९ विभावसुः सारथिनेववायुनाघनव्यपायेनगभस्ति-
मानिवबभूवतेनातितरांसुदुःसहः कटप्रभेदेनकरीवपार्थिवः ४०

र.वं.टी.
दि.२६

२१

नियुज्य तं होमतुरंगरक्षणे धनुर्धरं राजसुतैरनुद्रुतम् अपूर्णमेकेन शतक्र
तूपमः शतं क्रतूनामपविघ्नमाप सः ॥ ४१ ॥ ततः परं तेन मखाय यज्वना
तुरंगमुत्सृष्टमनर्गलं पुनः धनुर्भृतामग्रत एव रक्षिणां जहार शक्रः कि
ल गूढविग्रहः ॥ ४२ ॥ विषाददूलप्रतिपत्तिविस्मितं कुमारसैन्यं सप
दि स्थितं च तत् वसिष्ठधेनुश्च यदृच्छयागता श्रुतप्रभावा ददृशेऽथ नंदिनी ॥ ४३ ॥
तदंगनिस्यंदजलेन लोचने प्रमृज्य पुण्येन पुरस्कृतः सतां अतीन्द्रियेष्व
प्युपपन्नदर्शनो बभूव भावेषु दिलीपनंदनः ॥ ४४ ॥ स पूर्वतः पर्वतपक्षशा
तनं ददर्श देवं नरदेवसंभवः ॥ पुनः पुनः सूतनिषिद्धचापलं हरंतमश्वं रथ

शोत्ते स्तमेतणामं निमेवं॒हू नि मिहरिं विदित्वा हरिभिस्त्रवाजिभिः ग्नवो
चैर्दे नेगागान्तस्त्र थ्यांरनुः सवेणांथीरेणां निवर्त्तयन्तिवधद्वमस्त्वां प्राभा
जौग्नघामोमनीषिस्त्वमेवदेवेशायतेनिगद्यसे ग्न्यजस्रदीप्ताग्रयज्ञ
सामहुरोः क्रियाविधानायकल्प्येप्रवर्त्तसे ५ त्रिलोकनाथेनसतामम
रद्विषस्त्वयानिषेध्यानन्तदिव्यचक्षुषा सचिन्त्ययंकर्मसुधर्मचारिणां
त्वमेंतरायोभवसिव्युतोविधिः ६ तदंगमंग्यामवन्महाक्रतोः ग्नां
गुत्तवंरोपत्तिमोक्तुमर्हसि पथ्यः ग्नचेर्दर्शयिताररूंस्त्ररामलीमसामा
दप्तेनेनयद्दुर्जितं धिर् ७ अतिप्रगल्भैरनुनासमीरितं वचोनिशम्यपिप
निर्दिवौकसां ग्निवर्तयामास रथ्यं सरि स्रयः प्रचक्रमेप्रतिवक्तुमन्

र॰वं॰टी॰
द्वि॰ २२
22

यदात्थ राजन्यकुमार तत्तथा यशस्तु रक्ष्यं परतो यशोधनैः । जगत्प्रका
शं तदशेषमिज्यया भवद्गुरुर्लंघयितुं ममोद्यतः ॥४८॥ हरिर्यथैकः पुरु
षोत्तमः स्मृतो महेश्वरस्त्र्यंबक एव नापरः । तथा विदुर्मां मुनयः शतक्र
तुं द्वितीयगामी न हि शब्द एष नः ॥४९॥ अतोयमश्वः कपिलानुकारिणा
पितुस्त्वदीयस्य मयापहारितः । अलं प्रयत्नेन तवात्र मा निधाः पदं प
दव्यां सगरस्य संततेः ५२ ततः प्रहस्याह पुनः पुरंदरं व्यपेतभीर्भूमिपु
रंदरात्मजः । गृहाण शस्त्रं यदि सर्ग एष ते न खल्वनिर्जित्य रघुं कृती भवा
न् ५३ स एवमुक्त्वा मघवंतमुन्मुखः करिष्यमाणः सशरं शरास
नं । अतिष्ठदालीढविशेषशोभिना वपुःप्रकर्षेण विडंबितेश्वरः
५४ रघोरवष्टंभमयेन पत्रिणा हृदि क्षतो गोत्रभिदप्यमर्षणः

नवांबुदानीकमुहूर्त्तलांछने मंत्रध्वमोहं समयत्ययं मार्गणे ५६ नरेंद्रसूनोः सरूह
द्रुजां नरेंद्र विघ्नयभीमहुरशोणितैर्नैचितः पथा वनाखाद्रिजहर्षवर्मा सुगोः
...हले नैव मनुष्यशोणितं ५७ कुमारः कुमारो पितृकुमारविक्रमः स्तवावि
पास्फालनैककर्कशांगुलीभुजेश्चापेऽविशेषकां कितस्वनामचिह्नं निज
स्वानसायकं ५८ महानुभावेन नमस्यतोवित्रिणां सारेणसाकं स्वमहाप्रति
ध्वजं चुकोप नस्मे समस्तरारस्त्रियः प्रमत्ये रात्र्यपरोपनादिव ५९
नयोरुपांतस्थितसिद्धसैनिकं गरुत्मदाशीविषभीमदर्शनैः बभूववपुर्द
नमस्तैर्नयेषिणोर्गणोमात्ते रहोरेव समसायकैः ६० अतिसवर्स्वह्वहिः
नास्त्रमुदीरयिस्समा...यडध्य महस्य तेजसः प्रमाणकानि निर्वापयिष्यते नवा
सवः स्वनत्स्युतेव ह्रिमिवाद्रि रेषुयः ६१ मतः प्रकोष्ठे हरिचंदनांकितं प्रमथ्यमाना

र.वं.स.
द्वि-२२

तोवधीरनोदितिम रघुः शशांकार्द्धमुखेन पत्रिणा शरासनज्यामलु
नद्विडौजसः ६२ स चापमुत्सृज्य विवृद्धमत्सरः प्रणाशनाय प्रबलस्य विद्वि
षः महीध्रपक्षव्यपरोपणोचितं स्फुरत्प्रभामण्डलमस्त्रमाददे ६३ रघुर्भृशं
वक्षसि तेन ताडितः पपात भूमौ सह सैनिकाश्रुभिः निमेषमात्रादवधूय तद्व्य
थां सहोत्थितः सैनिकहर्षनिःस्वनैः ६४ तथापि शस्त्रव्यवहारनि
ष्ठुरे विपक्षभावे चिरमस्य तस्थुषः तुतोष वीर्यातिशयेन वृत्रहा पदं
हि सर्वत्र गुणैर्निधीयते ६५ असङ्गमद्रिष्वपि सारवत्तया न मे त्वदन्येन वि
सोढमायुधं अवेहि मां प्रीतमृते तुरंगमात् किमिच्छसीति स्फुटमाह वासवः ६६
ततो निषंगादसमग्रमुद्धृतं सुवर्णपुंखद्युतिरंजितांगुलिं नरेन्द्रसूनुः
प्रतिसंहरन्निषुं प्रियंवदः प्रत्यवदत्सुरेश्वरं ६७ अमोच्यमश्वं यदि मन्य

से विभो ततः समाप्ते विधिनैव कर्मणि । अजस्रदीक्षाप्रयतः स मद्गुरुः क्र-

तोरशेषेण फलेन युज्यतां ६८ यथा च वृत्तान्तमिमं सदोगतस्त्रिलोच-

नैकांशतया दुरासदः । तवैव संदेशहराद्विशांपतिः शृणोति देवेश त-

था विधीयतां ६९ तथेति कामं प्रतिशुश्रुवान्रघोर्यथागतं मातलिसारथिर्य-

यौ नृपस्य नातिप्रमनाः सदोगृहं सुदक्षिणासूनुरपि न्यवर्तत ७० ।

तमभ्यनन्दत्प्रथमं प्रबोधितः प्रजेश्वरः शासनहारिणा हरेः । परा-

मृशन्हर्षजडेन पाणिना तदीयमङ्गं कुलिशव्रणाङ्कितं ७१ इति क्षि-

तीशो नवतिं नवाधिकां महाक्रतूनां महनीयशासनः समारुरुक्षु

चकारः आरोहणपंक्तिमिव स्थितां पश्चात् अनंतरं विषयपराङ्मुखं

२.वे.नरः ततान सोपानपरंपरामिव २२ अथ स विषयव्यावृत्तात्मा यथाविधि सू

राज्ञां चिह्नं श्वेत नाम छत्रं मुनयः पवित्रवनतरवस्तेषां छायां

दि. २ध नवे नृपतिककुदं दत्वा यूने सितातपवारणं मुनिवनतरुच्छायां देव्या त

२५ या सह शिश्रिये गलितवयसामिक्ष्वाकूणामिदं हि कुलव्रतं ७३

इति श्री रघुवंशे महाकाव्ये कविराजकालिदासकृतौ रघुवरा

लाभो नाम तृतीयः सर्गः ३ ॐ श्रीगणेशाय नमः ॥ स राज्यं गुरुणा

प्राप्य यथा तथा गुरुणा ये दिनान्ते सायं स्थापितं प्राप्य अग्निरिव

दत्तं प्रतिपद्याधिकं बभौ दिनान्ते निहितं तेजः सवित्रेव हुताशनः १ न्या

स्तास्त्रं दिलीपं च तं च शुश्रूषुषां पतिम् राज्ञामुद्धृतनाराचे हृदि शल्य

मिवार्पितम् २ पुरुहूतध्वजस्येव तस्योन्नयनपंक्तयः नवाभ्युत्थान ।

नदर्शिन्यो ननन्दुः सप्रजाः प्रजाः ३ दिलीपानन्तरं राज्ये तं निशम्य प्रतिष्ठि

संतानसहिताः पौराः आनंदं प्राप्य प्रजापालनात्मक राजधर्म= श्रुत्वा राज्यानंतरं

प्रजापालनात्मक राजधर्म=

...जनानां नयनपंक्तयो यासां सा ... =२

पूर्वप्रधूमितो राज्ञां हृदयेऽग्निरिवोत्थितः ३ सममेव समाक्रान्तं द्वयं द्विरदगामि
ना तेन सिंहासनं पित्र्यमखिलं चारिमंडलं ५ छायामंडललक्ष्येण तमदृश्या कि
ल स्वयम् पद्मा पद्मातपत्रेण भेजे साम्राज्यदीक्षितं ६ परिकल्पितसान्निध्या
काले कालेषु वंदिषु स्तुत्यं स्तुतिभिरर्थ्याभिरुपतस्थे सरस्वती ७ मनुप्र
भृतिभिर्मान्यैर्भुक्ता यद्यपि राजभिः तथाप्यनन्यपूर्वेव तस्मिन्नासीद्वसुंधरा ८ ॥
स हि सर्वस्य लोकस्य युक्तदंडतया मनः आददे नातिशीतोष्णो नभस्वानिव दक्षिणः ९
कामं कर्णान्तविश्रान्ते विशाले तस्य लोचने चक्षुष्मत्ता तु शास्त्रेण सूक्ष्मकार्यार्थदर्शिना १०
यथा प्रह्लादनाच्चंद्रः प्रतापात्तपनो यथा तथैव सोऽभूदन्वर्थो राजा प्रकृतिरंजनात् ११
नयविद्भिर्नवे राज्ञि सदसच्चोपदर्शितं पूर्व एवाभवत्पक्षस्तस्मिन्नाभवदुत्तरः १२ ॥

नवे राजानउद्दिश्य =

तस्य सरजसस्य प्रजारंजनेन राजु प्रतीकारेतश्च प्रताप तस्थितीकरणातेन स्वस्थे सा वयाना पतर हु = २

र०वं०२०
द्वि०२५चं०
प्र=

मंदोत्कंठाः कृतास्तेन गुणाधिकतया गुरौ फलेन सहकारस्य पुष्पोद्गम इव प्रजाः
१३ पंचानामपि भूतानामुत्कर्षं पुपुषुर्गुणाः नवे तस्मिन्महीपाले सर्वं नवमिवाभ
वत् १४ लब्धप्रशमनस्वस्थमथैनं समुपस्थिता पार्थिवश्रीर्द्वितीयेव शरत्पंकजल
क्षणा १५ निर्वृष्टलघुभिर्मेघैर्मुक्तवर्त्मा सुदुःसहः प्रतापस्तस्य भानोश्च युगपद्
व्यानशे दिशः १६ वार्षिकं संजहारेन्द्रो धनुर्जैत्रं रघुर्दधौ प्रजार्थसाधने तौ हि
पर्यायोद्यतकार्मुकौ १७ अपि विज्यमासुरेकं तं समयो यं रघोरिति संयन्तः शोकि
ते नैव संजह्रे शानमन्युना १८ पुंडरीकातपत्रस्तं विकसत्काशचामरः ऋ
तुर्विडंबयामास न पुनः प्राप तच्छ्रियं १९ प्रसादसुमुखे तस्मिंश्चन्द्रे च विशदप्रभे त
दा चक्षुष्मतां प्रीतिरासीत्समरसा द्वयोः २० हंसश्रेणीषु तारासु कुमुद्वत्सु च वारिषु

२८

पदीयोगा उपतौ कार्मुकौ यौ ... तौ यत्र ... इतीव मुत्रतु ...

१द्वि
मरीगया

विभक्तनवपल्लवदीयानांपयसांलायमासामिव २१ तस्य गोप्तुर्हि रेफाणां केशान्यत्वलाति
वासिनो स्वरसंवादिभिः कंठैः शालिगोप्यो जगुर्यशः २२ इक्षुच्छायानिषादि
न्यस्तस्य गोप्तुर्गुणोदयं आकुमारकथोद्धृतं शालिगोप्यो जगुर्यशः २३ प्रससादो
दयादंभः कुंभयोनेर्महोजसः रघोस्त्वभिभवाशंकि चुक्षुभे द्विषतां मनः २४ मदोदग्राः
ककुद्मंतः सरितां कूलमुद्रुजः लीलाखेलमनुप्रापुर्महोक्षास्तस्य विक्रमं २५ प्रसवैः
सप्तपर्णानां मदगंधिभिराहताः असूययेव तन्नागाः सप्तधैव प्रसुस्रुवुः २६ सरितः कुर्वती
गाधाः पथश्चाश्यानकर्दमान् यात्रायै नोदयामास तं शक्तेः प्रथमं शरत् २७ तस्मै स
म्यग्घुतो वह्निर्वाजिनीराजनाविधौ प्रदक्षिणार्चिर्व्याजेन हस्तेनेव जयं ददौ २८ स गुप्तमू
लप्रत्यंतः शुद्धपार्ष्णिरयान्वितः षड्विधं बलमादाय प्रतस्थे दिग्जिगीषया २९ अवाकिर
न्वयोवृद्धास्तं लाजैः पौरयोषितः पृषतैर्मंदरोद्धूतैः क्षीरोर्मय इवाच्युतं ३० स ययौ प्रथमं प्राचीं

र. वं. स.
हि. २६ च.

26

वं = २

कल्पद्रुमो न हृष्ट आविस्तेत्यमरः = २

तस्यः प्राचीनबर्हिषा अहितोनिलेनाद्रुतैस्तर्जयन्निव केतुभिः ३१ रजोभिः स्यंदनोद्धुतैः गजैः
धूलिधूसरितैरिवोद्भवन्नपि निम्नं भ्रुवस्तलमिव व्योमकुर्वन्व्योमेव भूतलं ३२ अथ शुभ्रो सहस्रया
पादपिभिः कपिशाः पश्चात्प्रयायिभिः रेकाः शुक्तिरे मार्गे नितम्बगाः ३३ मरुपृष्ठान्युदंभांसि नाव्याः सुप्रतरा नदीः विपिनानि प्रकाशानि शक्तिमत्वाच्चकार सः ३४ स सेनां महतीं कर्षन्पूर्वसागरगामिनीम् बभौ हरजटाभ्रष्टां गंगामिव भगीरथः ३५ त्याजितैः फलमुत्खातैर्भग्नैश्च बहुधा नृपैः तस्यासीदुल्बणो मार्गः
पादपैरिव दन्तिनः ३६ पौरस्त्यानेवमाक्रामंस्तांस्ताञ्जनपदाञ्जयी प्राप तालीवनश्याममुपकण्ठं
महोदधेः ३७ अनम्राणां समुद्धर्तुस्तस्मात्सिन्धुरयादिव आत्मा संरक्षितः सुह्मैर्वृत्तिमाश्रित्य वैतसीं ३८ वंगानुत्खाय तरसा नेता नौसाधनोद्यतान् निचखान जयस्तम्भान्गंगास्रोतोन्तरेषु सः ३९
आपादपद्मप्रणताः कलमा इव ते रघुं फलैः संवर्धयामासुरुत्खातप्रतिरोपिताः ४० ॥ = =

गंगास्रोतस्य प्रवाहस्य मध्येषु =

उत्खातप्रतिरोपिताः आपादपद्मप्रणताः कलमा इव फलैः संवर्धयामासुः

प्रथमं उत्खाताः पश्चात्प्रतिरोपिताः ते वंगाः फलैः धनैः रघुं =

कांबोजाः समरे सोढुं तस्य वीर्यमनीश्वराः गजालानपरिक्लिष्टैरक्षोटैः सार्द्धमानताः ७६
तेषां सदश्वभूयिष्ठास्तुंगा द्रविणराशयः विविशुस्ते विशांनाथं सुदन्वंतमिवापगाः ७७
ततो गौरीगुरुं शैलमारुरोहाश्वसाधनः वर्द्धयन्निव तत्कूटानुद्धूतैर्धातुरेणुभिः ७८
शशंस तुल्यसत्वानां सैन्यघोषेप्यसंभ्रमं गुहाशयानां सिंहानां परिवृत्यावलोकितं ७९
भूर्जेषु मर्मरीभूताः कीचकध्वनिहेतवः गंगाशीकरिणो मार्गे मरुतस्तं सिषेवि
रे ८० विशश्रमुर्नमेरूणां छायास्वध्यास्य सैनिकाः दृषदो वासितोत्संगा निषण्णमृगनाभि
भिः ८१ सरलासक्तमातंगग्रैवेयस्फुरितत्विषः आसन्नोषधयो नेतुर्नक्तमस्नेहदीपिकाः ८२
तस्योत्सृष्टनिवासेषु कंठरज्जुक्षतत्वचः गजवर्ष्म किरातेभ्यः शशंसुर्देवदारवः ८३
तत्र जन्यं रघोर्घोरं पार्वतीयैर्गणैरभूत् नाराचक्षेपणीयाश्मनिष्पेषोत्पतितानलं ८४

श्री ४

र.वं.च.
२९

शरैरुत्सवसंकेतान्स कृत्वा विरतोत्सवान् जयोदाहरणं बाह्वोर्गापयामास किन्नरान् ८५
परस्परेण विज्ञातस्तेषूपायनपाणिषु राज्ञा हिमवतः सारो राज्ञः सारो हिमाद्रिणा ८६
तत्राक्षोभ्यं यशोराशिं निवेश्यावरुरोह सः पौलस्त्यतुलितस्याद्रेरादधान इव ह्रियं ८७
चकंपे तीर्णलौहित्ये तस्मिन्प्राग्ज्योतिषेश्वरः तद्गजालानतां प्राप्तैः सह कालागुरुद्रुमैः ८८
न प्रसेहे स रुद्धार्कमधारावर्षदुर्दिनम् रथवर्त्मरजोप्यस्य कुत एव पताकिनीं ८९
तमीशः कामरूपाणामत्याखंडलविक्रमं भेजे भिन्नकटैर्नागैरन्यानुपरुरोध यैः ९० का
मरूपेश्वरस्तस्य हेमपीठाधिदेवताम् रत्नपुष्पोपहारेण छायामानर्च पादयोः ९१ इति
जित्वा दिशो जिष्णुर्न्यवर्तत रथोद्धतं रजो विश्रामयन्राज्ञां छत्रशून्येषु मौलिषु ९२ स विश्व
जितमाजह्रे यज्ञं सर्वस्वदक्षिणं आदानं हि विसर्गाय सतां वारिमुचामिव ९३ सत्रान्ते सचिवसखः

भक्तिक्रियाभिर्गुर्वीभिः शमितपराजयव्यलीकान् काकुत्स्थस्तिरवरहोन्त्रकावरोधा
जन्यान्स्वपुरप्रत्यागमेने ८४ यज्ञान्ते तेन मखवभृथाभिषेकशुद्धैः सत्कारैः शमितपराज
यव्यलीकाः ॥ श्रामंश्रोन्नुकवनिर्नस्त्रुंतान्हूसष्टाः स्वानि स्वानि वनिभुजः श्रा
गिजग्मुः ॥ ८५ ते रेखाध्वजकुलिशातपत्रचिह्नं सम्राजश्चरणयुगं प्रसादलभ्यं ।
प्रस्थानप्रणतिभिरंगुलीषु चक्रुर्मौलिस्रक्च्युतमकरंदरेणुगौरं ॥ ८६ ॥
इति श्रीरघुवंशे महाकाव्ये कविराजकालिदासकृतौ रघुदिग्विजयो नाम ।
चतुर्थः सर्गः ॥ ४ ॥ ॐ तमध्वरे विश्वजिति क्षितीशं निःशेषविश्राणितकोशजातम् ।
उपात्तविद्यो गुरुदक्षिणार्थी कौत्सः प्रपेदे वरतन्तुशिष्यः ॥ १ ॥ स मृण्मये

जातशब्दः समूहार्थः
जातं तु सजातीयसमूहे इति
यादवकोशः

कृतांजलिः कृत्यविचारदक्षो विशां
पतिर्विष्टरभाजमाह

र.वं.प. वीतहिरण्मयत्वात्पात्रे निधायार्घ्यमनर्घशीलः श्रुतप्रकाशं यशसा प्रकाशः
प्रत्युज्जगामातिथिमातिथेयः २ तमर्चयित्वा विधिवद्विधिज्ञस्तपोधनं मा
३३ नधनाग्रयायी (विशांपतिर्विष्टरभाजमारात्कृतांजलिः कृत्यविदित्युवाच)
३ अप्यग्रणीर्मंत्रकृतामृषीणां कुशाग्रबुद्धे कुशली गुरुस्ते यतस्त्वया
ज्ञानमशेषमाप्तं चैतन्यमुग्रादिव दीधितेन ४ कायेन वाचा मनसा च श
श्वत्स्वराड्जिगीषोर्धैर्यविलोपि तत्तम आपद्यते न व्ययमन्तरायैः कच्चिन्म
हर्षेस्त्रिविधं तपस्तत् ५ आधारबंधप्रमुखैः प्रयत्नैः संवर्द्धितानां सुतना
निर्विशेषम् कच्चिन्न वाय्वादिरुपप्लवो वः श्रमच्छिदामाश्रमपाद

कुतेश्च: निर्गते निसे
कृतसं शायसिन्
मानेच याथा
तथा

क्रियानिमित्तेष्वपि वत्सलत्वादभग्नकामा मुनिभिः कुशेषु तदंक।
शय्याच्युतनाभिनाला कच्चिन्मृगीणामनघा प्रसूतिः ७ निर्वर्त्यते।
यैर्नियमाभिषेको येभ्यो निवापांजलयः पितॄणाम् तान्युंछषष्ठांकितसै।
कतानि शिवानि वस्तीर्थजलानि कच्चित् ८ नीवारपाकादि कडंगरीयैरामृश्य।
ते जानपदैर्न कच्चित् कालोपपन्नातिथिकल्प्यभागं वन्यं शरीरस्थितिसा।
धनं वः ९ अपि प्रसन्नेन महर्षिणा त्वं सम्यग्विनीयानुमतो गृहाय का।
लो ह्ययं संक्रमितुं द्वितीयं सर्वोपकारक्षममाश्रमं ते १० तवार्हतो नाभिगमेन।
तृप्तं मनो नियोगक्रिययोत्सुकं मे अप्याज्ञया शासितुरात्मना वा प्राप्तो

र. वे. पं.
३१

सिंसंभावयितुं वनान्तमां १२ उत्तुङ्गपात्रान्तमिन यायस्यकि हृदारामंपिशां निरास्य
स्वार्थोपपत्तिं श्रितिं दुर्वेलाशास्तिमिन्वोचहृदन्तेन्मृग्याः १२ सर्वत्रमेनोवा नेमवे हि
राजन्नाथे कुतं सत्वर्यं सुमे प्रजानां सूर्यां नयमा वृणाय हृदेः कल्यन्तेलाकुप्या
कथं नमिहेव १३ भक्तिः त्वमीदेवुझ लोचितानि वीमहीभागतयानिशेषे स्व
तीनकालं सत्वं प्रमुयेन स्वामर्थे भावादितिमे विषादः १४ शरीरमात्रेण मे न
रेन्द्रतिष्ठन्नामा सिंप्रनियादतर्ह्धिः स्मार एपकोयान्तफलप्रसानिं स्तेकेन मीवारे
श्वावशिष्ठः १५ स्थानेभवानेकनरायिपस्तन्नेकि चनं मावजे श्वनक्रियायां
योयाँयं पीतस्यमरे हि मामतोः कलादयः मामनतरो हि वहेः १६

र. वे. पं. ३१

31

न्दंन्दुल्लोवद्न्यकोर्यौ गर्वधर्मो हात्मेमं ह्ययतिज्ञो सहसैव तेनिर्गलितो भूशं मेशरा

द्वैनेनंदेतिं चानकोपि १७ एतावदुक्त्वा प्रतियातवुकामेषिष्यमहर्षेच यतिनिर्वि

ष्य किं वस्तु विहरन्त्युहवे यदेयं तया कियह्रुतेतमन्ववृत्तं १८ ततोऽपर्या विहि

हिताधराय नसेसेस्य यावेश विवर्जिताय वर्णाश्रमाणां गुरवे सवर्णे विचव

णः प्रस्तुतमाचचक्षे १९ समाप्तविघ्नेन मया महर्षिर्विज्ञापितो भक्तहृदय।

दिशाये समेम्चिरायासबलितोयचारं तां पत्तिमेवं वाग्राम्ययत्त्वरस्तात् २०

निर्वेधसंजातसुखार्थकार्ये मचिंतयित्वा गहनं गृहीत मुक्त्वाः विनाम विधायपर्हि।

संतयामे कोटीश्वतत्त्वांदशं चाहहरैति २१ सोऽहं सपर्या विधिभाजनेनंमत्वा

र.वं.पं. भवंतमप्रभुशावशेषं स्वप्नुत्सहे संप्रतिनोपरोद्धुं मन्येतरस्याहुतनिष्क्र

१२ यस्य २२ इत्थं द्विजेन द्विजराजकांतिर्निवेदितो वेदविदां वरेण एनो

निवृत्तेंद्रियवृत्तिरेनं जगाद भूयो जगदेकनाथः २३ गुर्वर्थमर्थी श्रुत

पारदृश्वा रघोः सकाशादनवाप्य कामं गतो वदान्यांतरमित्ययं मे

मा भूत्परीवादनवावतारः २४ स त्वं प्रशस्ते महिते मदीये वसंश्चतुर्थोग्निरि

वाग्न्यगारे द्वित्राण्यहान्यर्हसि सोढुमर्हन् यावद्यते साधयितुं त्वदर्थं २५

तथेति तस्यावितथं प्रतीतः प्रत्यग्रहीत्संगरमग्रजन्मा गामात्त

सारां रघुरप्यवेक्ष्य निःक्रष्टुमर्थं चकमे २६ वसिष्ठमंत्रोक्षणजात्प्रभावा

उदन्वदाकाशमहीधरेषु मरुत्सखस्येव बलाहकस्य गतिर्विजघ्ने न हि तद्रथस्य
२७ अथाधिशिश्ये प्रयतः प्रदोषे रथं रघुः कल्पितशस्त्रगर्भं सामन्तसंभाव
नयैव धीरः कैलासनाथं तरसा जिगीषुः २८ प्रातः प्रयाणाभिमुखाय तस्मै
सविस्मयाः कोशगृहे नियुक्ताः हिरण्मयीं कोशगृहस्य मध्ये वृष्टिं श
शंसुः पतितां नभस्तः २९ तं भूपतिर्भासुरहेमराशिं लब्धं कुबेरादभिया
स्यमानात् दिदेश कौत्साय समस्तमेव पादं सुमेरोरिव वज्रभिन्नं ३० जन
स्य साकेतनिवासिनस्तौ द्वावप्यभूतामभिनन्द्यसत्त्वौ गुरुप्रदेयाधिकनिःस्पृ
होऽर्थी नृपोऽर्थिकामादधिकप्रदश्च ३१ अथोष्ट्रवामीशतवाहितार्थं

इत्थं व्यक्ते रणेन तत्सर्वकार्यं प्रास्थितो वा यस्मै वा चैकोत्सः ॥३२

न्याये नार्जनमर्थस्य यावत्त्वं वर्यनं तया ।
तस्मात्त्वं प्रतिपत्तिस्तु यज्ञादि चतुर्विधं मितिवाग्मन्दकः =

र.वं.पं.
३३
33

प्रजेश्वरं प्रीतमना मनीषी । किमत्र चित्रं यदि कामसूर्भूर्वृत्ते स्थितस्याधिपा-
तेः प्रजानां अचिन्तनीयस्तु तव प्रभावो मनीषितं द्यौरपि येन दुग्धा ॥३३॥ आ-
कथितकृत्य नीचवर्तीते = शास्यमन्यत्पुनरुक्तभूतं श्रेयांसि सर्वाण्यधिजग्मुषस्ते पुत्रं लभस्वा-
त्मगुणानुरूपं भवन्तमीड्यं भवतः पितेव ॥३४॥ इत्थं प्रयुज्याशिषमग्रज- अग्रजन्मा द्विजश्रेष्ठे भ्रातरि च ब्राह्मणे स्मृतः । इति यादवः =
न्मा राज्ञे प्रतीयाय गुरोः सकाशं राजापि लेभे सुतमाशु तस्मादालोकम-
र्कादिव जीवलोकः ॥३५॥ ब्राह्मे मुहूर्ते किल तस्य देवी कुमारकल्पं सुषुवे
कुमारं अतः पिता ब्रह्मण एव नाम्ना तमात्मजन्मानमजं चकार ॥३६॥ रूपं
तदोजस्वि तदेव वीर्यं तदेव नैसर्गिकमुन्नतत्वं ३७ न कारणात्स्वाद्बिभि-

दैः कुमारः प्रवर्त्तितो दीप इव प्रदीपात् ३७ उपात्तविद्यं विधिवद्गुरुभ्यस्तं यौ
वनोद्भेदविशेषकान्तं श्रीः साभिलाषापि गुरोरनुज्ञां धीरेव कन्या पितुराचकांक्षे ३८ अथेश्वरेण क्रथकैशिकानां स्वयंवरार्थं स्वसुरिन्दुमत्याः आ
प्तः कुमारानयनोत्सुकेन भोजेन दूतो रघवे विसृष्टः ३९ तस्योपकार्या
रचितोपचारा वन्येतरा जानपदोपदाभिः मार्गे निवासा मनुजेन्द्रसूनोर्ब
भूवुरुद्यानविहारकल्पाः ४० स नर्मदारोधसि शीकरार्द्रैर्मरुद्भिरानर्तित
नक्तमाले निवेशयामास विलंघिताध्वा क्लान्तं रजोधूसरकेतु सैन्यं ४१
अथोपरिष्टाद्भ्रमरैर्भ्रमद्भिः प्राक्सूचितान्तःसलिलप्रवेशः निर्धौतदा
तं श्लाघ्यसंबंधमसौ विचिंत्य दारक्रियायोग्यदशं च पुत्रं प्रस्थापयामास ससैन्यमेनमृद्धां वि
दर्भाधिपराजधानीम् ४०

पाकांक्षेव

२४

प्रादुर्भमूव

किंकुर्व न्नमन्

र.वं.पं. नामल्लगंडस्थितिर्गन्धः सरित्तोगजंउन्मामज्जु ४३ निःशेषविक्षालि
३४ तधातेनापि वप्रक्रियामृक्षवन्तस्तटेषु नीलोर्ध्वरेखोशवलेन शं॥
स्नदंतद्वयेनाश्मविकुंठितेनं ४४ संहारविक्षेपलघुक्रियेण हस्तेन
तीराभिमुखः सशब्दं बभौसतिंद्रृन्दहतस्तरंगानूवार्यर्गलाभंग
स्थितः इवप्रवृत्तः ४५ शुभ्रे शैलोपमः शैवलमंजरीणांजालानिकर्षन्
तेनगजेन प्रसाधितः शोभितः शोभि समूह्यैव एं
नरस्थासपश्चात् पूर्वंतदुत्पीडितवारिराशिः सरित्प्रवाहस्तटमुत्सस
र्प ४६ तस्यैकनागस्यकपोलभित्त्योर्जलावगाहक्षणमात्रशांतांव
न्येतरानेकपदर्शनेन पुनर्दिदीपेमदुर्दिनश्रीः ४७ सप्तच्छदक्षी

सैन्यानांगजराजानां

मदकर्दमात लक्ष्मीः

कार्यांगजवुधिन्नर्गलः नि
रोधकेकार्यस्मभंजनेप्रवृत्त
(सः) एवस्थितः

ता॥

कटु तिक्तकषायस्य सौरभ्ये पि स्मृतौ
तैतं तृतीयाद्वः =

अंकुशा ताडनाद्यैर्यैः

कटुप्रवाहमसह्यमाघ्राय मदं तदीयं विलंघिताधोरणतीव्रयत्नाः सेनागजे
न्द्रा विमुखा बभूवुः ४८ स छिन्नबंधद्रुतयुग्यशून्यं भग्नाक्षपर्यस्तरथं क्षणेन
रामापरित्राणविहस्तयोधं सेनानिवेशं तुमुलं चकार ४९ तमापतंतं
नृपतेरवध्यो वन्यः करीति श्रुतवान्कुमारः निवर्तयिष्यन्विशिखेन कुंभे
जघान नात्यायतकृष्टचापः ५० स विद्धमात्रः किल नागरूपमुत्सृज्य
तद्विस्मितसैन्यदृष्टः स्फुरत्प्रभामण्डलमध्यवर्ती कान्तं वपुर्व्योमचरं
प्रपेदे ५१ अथ प्रभावोपनतैः कुमारं कल्पद्रुमोत्थैरवकीर्य पुष्पैः उ
वाच वाग्मी दशनप्रभाभिः संवर्धितोरःस्थलतारहारः ५२ मतंगशा

तमापतंतं नदीर्घकृष्टधनुर्यैन यस्ता
कृष्णाः सन् =
जः =
येनदेव तन वेश विस्मितं सैन्यं तेन
दृष्टः =

पटुवक्ता
पुष्पस्तबकाहारो येन
मतंगजरूपेण धातात्

35

र. वं. पं.
३५

सः महर्षिः अनुनीतः प्रणतेन सता मया मृदुतामगच्छत् हि यदग्न्यातपसंप्रयोगात् उष्णत्वं भवति यत् शैत्यं सा प्रकृतिः = ५४

पादवलेपमूलादवाप्तवानस्मि मतंगजत्वं। अवेहि गंधर्वपतेस्तनूजं प्रि
यंवदं मां प्रियदर्शनस्य ॥ ५३ ॥ स चानुनीतः प्रणतेन पश्चान्मया महर्षि
र्मृदुतामगच्छत्। उष्णत्वमग्न्यातपसंप्रयोगाच्छैत्यं हि यत्सा प्रकृतिर्जल स्य
स्य ॥ ५४ ॥ इक्ष्वाकुवंशप्रभवो यदा ते भेत्स्यत्यजः कुंभमयोमुखेन सं
योक्ष्यसे स्वेन वपुर्महिम्ना तदेत्यवोचत्स तपोनिधिर्मां ॥ ५५ ॥ संमोचि
तः सत्ववता त्वयाहं शापाच्चिरप्रार्थितदर्शनेन प्रतिप्रियं चेद्भवतो न कु
र्यां वृथा हि मे स्यात्स्वपदोपलब्धिः ॥ ५६ ॥ संमोहनं नाम सखे ममास्त्रं प्रयो
गसंहारविभक्तमंत्रं गांधर्वमादत्स्व यतः प्रयोक्तुर्न चारिहिंसा विज यश्च हस्ते

इक्ष्वाकुवंशप्रभवः अजः यदा कुंभं अयोमुखेन भेत्स्यति तदा स्वेन महिम्ना वपुषा संयोक्ष्यसे इति स तपोनिधिः मां अवोचत् = ५५

चिरप्रार्थितदर्शनेन सत्ववता त्वया शापात् अहं संमोचितः चेत् यदि भवतः प्रतिप्रियं न कुर्यां तर्हि मे स्वपदोपलब्धिः वृथा स्यात् = ५६

हे सखे प्रयोगसंहारविभक्तमंत्रं गांधर्वं संमोहनं नाम मम अस्त्रं आदत्स्व यतः प्रयोक्तुः अरिहिंसा न भवेत् हस्ते विजयश्च भवेत् = ५७

ह्रियाअलंमांप्रतिमुहूर्तंयत्वं प्रहरन्नपि दयापरःअभूः उपच्छंदयति मयि प्रतिषेधरौक्ष्यं त्वयानप्रयोज्यं = ५८

मलंह्रियामांप्रतियन्मुहूर्तंदयापरोभूःप्रहरन्नपित्वं तस्मादुप।
च्छंदयतिप्रयोज्यंमयित्वयानप्रतिषेधरौक्ष्यम् ५८ तथेत्युपस्पृश्यपय।
ःपवित्रंसोमोद्भवायाःसरितोनृसोमः उदङ्मुखःसोस्त्रविदस्त्रमंत्रं।
जग्राहतस्मान्निगृहीतशापात् ५९ एवंतयोरध्वनिदैवयोगादा।
सेदुषोःसख्यमचिंत्यहेतु एकोययौचैत्ररथप्रदेशान्सौराज्यरम्या।
नपरोविदर्भान् ६० तंतस्थिवांसंनगरोपकंठे तदागमारूढगुरुप्रहर्षः
प्रत्युज्जगामक्रथकैशिकेंद्रश्चंद्रंप्रवृद्धोर्मिरिवोर्मिमाली ६१ प्रवेश्यचै।
नंपुरमग्रयायीनीचैस्तथोपाचरदर्पितश्रीः मेनेयथातत्रजनःसमेतोवैद
चै

र.वं.पं. नस्याहुरिपुरुद्यैः प्रलीनैः प्रविष्टां मागद्वारवेदिविनिवेशितपूर्णकुंभसेतां रम्यां रघुप्रति

तद.रा. नयोग्यपटह यवन

३६ निधिःसनवोपकार्यां वास्योत्पतरामिवदशां मदनोथ पुत्रवासदृक् तत्रस्वयंवरा

36 रसमाहृतराजलोकं कन्याललामक मनीयमजस्य लिप्सोः भावावबोधक।

लुषाददृशेतिवरांश्रो निद्राचिरेणनयनाभिमुखीव भवर्ष्वेश्र पवज्ञतेरी॥॥ श्रीः।

तेकर्णभूषणानिपीडितपीवरांसंशय्योत्तरच्छदविमर्दकृशांगरागं मेवेन

लिकाललितवंधमनोहराभिः प्राबोधयन्नुषसि वाग्भिरुदारवाचः ॥ सांत्रि

गत्तामनिमतांवरचंचमाध्याधात्राहितपुरेवन्न तुर्जगत्तनोर्विभक्तायामेकन

लवविभगि त्तगुरुविलि इत्तसामवानपरपुर्यं पद्मावलंबी॥॥६॥ निद्रावशेनभ

हुमारेविमन्तथापिता।

इ मयवाहोमार एकेनोहुत्रशक्य =

लक्ष्मीनिद्रावशेन भवगाषर्युत्सुकत्वमविततया पितिनिशिरंवदितात्म्रवलाद्ददक्षनयेत्तमाणां नीयेन चंद्रेण विनोदयति सः चंद्रोपि दिगंतलंबी सन् त्वदाननरुचिं विजहाति = १ यदा निद्रावशेन भव
तामनपेतमाणां लक्ष्मीनिशिरंवदितात्म्रवलाद्द पर्युत्सुकत्वं येन चंद्रेण विनोद ... दिगंतलंबी सन् त्वदाननरुचिं विजहाति = द्वितीयोन्वय
प्रविचार्यमाणा

अमनयमानस... लक्ष्मीत्विरहस्य इति
स्वनितं =
अंत: प्रस्फुरमा नयस्तेतरतारं
तवचक्षुः प्रवलितभ्रमरं पद्मं
चक्षुः हृतनादुस्नपद निषिषितेन
तीवृत्सद्यः परस्परतुलामधि
रोहतात्वे ... ७० अनीलिने

वनाहं नयेत्तममाणां पर्युत्सुकत्वम् अवलानि निशिरं ठितेव लक्ष्मीर्विनो
दयति येन दिगंतलंबी सोपि त्वदाननरुचिं विजहाति चंद्रः ६६ निद्रावशं
त्वयि गते शशिनाकथं चिदात्मानमानन रुभवतो चिनोप लक्ष्मीर्विभा
तसमये पिहिरदर्शनेन पर्युत्सुकात्मनो निशिरंवदितेव ६९ तद्वल्लभनायु
गपदुन्मिषितेन तावत्सद्यः परस्परतुलामधिरोहितां द्वे प्रस्फुरदमानं
यत्र खेतरतारमतव हृत्तलवर्पलितभ्रमरं वपद्मम् ७० च्युतेनस्वयं हरति शुभ्र
मनोकहानां संसज्यते सरसिजैररुणांशुभिन्नैः स्वाभाविकं परगुणेन विभा
तवायुसेरा...मीप्स हि वते हरवमाहृतस्य ७१ तामोदरेखुपतिनेदुमयद्भवेण
निर्यातहाग्गरिका विशंति हि मांभः संलक्ष्यते दशनचंद्रकयानुविद्धैवोद्य
त्वत्पपरभागमविस्मितते ७२ याठत्पतापनिपिराक्रमतेनमानुरह्नायता

विभातवायु: स्वाभाविकं
ते ... खमाहृतस्य मोरस्य
तपरगुणेनाइदपूविव
... हृतस्य खंडंश्चेन्मय...
यं अनोकहानां पुष्पाहरं
निसरुणांशुभिन्नैः सरसिजैः
संसज्यते = ७१ तं मानी
उदयतांशोधेवानेषु =

यावत्प्रतापनिधिः ... क्रमतेनमानुरह्नायच्छति ... नतमोनिरस्त
देवीयल्लाघोयनायतरं तांवयपिजातेसतितवभरु कि वारिहन्त्वयं छिनत्ति = ७२

र॰ वं॰ पं॰

३८

37

सूर्यसारथिना अंधकारः युद्धे अग्रसरतां तेषां हे शत्रून्

दरुणेन तमो निरस्तं आयोधनाग्रसरतां त्वयि वीरयाते किं वा रिपूंस्तव।

गुरुः स्वयमुच्छिनत्ति ७२ शय्यां जहत्युभयपक्षविनीतनिद्राः सैन्या गजा मुखर

शृंखलकर्षिणस्ते येषां विभान्ति तरुणारुणरागयोगाद्भिन्नाद्रिगैरिकतटा।

इव दंतकोशाः ७३ दीर्घेष्वमी नियमिताः पटमंडपेषु निद्रां विहाय वनजाक्ष।

वनायुदेश्याः वक्त्रोष्मणा मलिनयंति पुरोगतानि लेह्यानि सैंधवशिलाश।

कलानि वाहाः ७४ भवति विरलभक्तिर्म्लानपुष्पोपहारः स्वकिरणपरिवेषोद्भे

दशून्याः प्रदीपाः अयमपि च गिरं नस्त्वत्प्रबोधप्रयुक्तामनुवदति शुकस्ते॥

मंजुवाक्पंजरस्थः ७५ इति विरचितवाग्भिर्वंदिपुत्रैः कुमारः सपदि विग।

तनिद्रस्तल्पमुज्झांचकार मदपटु निनदद्भिर्बोधितो राजहंसैः सुरगज इव

गांगं सैकतं सुप्रतीकः ७६ इति स विहितनिद्रस्तल्पमल्पेन रोसे सुरगज इव

श्लोकरचना

सतत्रमंत्रेषु १. रत्नैर्गृहीता २. वेदर्शनिर्दिष्ट ३. परार्थ्यवर्णा ४. तात्कुञ्जिया ५. तेषांमहार्हा ६. नेत्रव्रजाः ७ अथस्तवेन ८ पु

रोयकंठो ९. मनुष्यवाह्यं १०. तस्मिन्विधया ११. तांप्रत्यभिव्य १२. कश्चित्करस्थां १३. विस्रस्तमंसा १४ ऊर्ध्व

याया १५ आकुंचिताग्रांगुलि १६. निवेशयवामं १७ विलासिनी १८ कश्चिद्यथा १९ ततोन्वयाणां २०

असौ शरण्यः २१ कामंनृपाः २२ क्रियाप्रबंधादयं २३. अनेनैव दिक्षु सिद्ध २४. एवं तयोक्ते तमवेक्ष्य २५. तांसैव वेत्र २६.

जगाद चैनां २७. अनेन पर्याय २८. निसर्गभिन्ना २९. अथांगराजात् ३०. ततः परं दुःप्रसह ३१. अवंतिनाथोयं ३२.

अस्य प्रयाण्येषु ३३. असौमहाकालनिकेत ३४. अनेन यूना सह ३५. तामिन्दुमिथो निति ३६. तामग्रतस्तामरस ३७. संग्रामनिर्विष्टसहस्र ३८.

[illegible] ३९. सकामसिं [illegible] ता ३९. जा व [illegible] य नियोगंदगुण [illegible] तस्यान्वये भूपति ४१. आयोधनेध्र ४२. असौ कुलधर्म

तस्याः प्रकोष्ठे ज्याघातरेखे ... [illegible] अरातन्यैवोमृगराजकेटी ... यस्यात्मगेहे ४७. यस्यावरोधस्तनचंदनानां ४८. अनेन तार्क्ष्य ४९.

मंत्रिपदर्शी ५४. ताः सैरसेनाधिपं ५५. नीपान्वयः पार्थिव ५६. यस्यात्मगेहे ... यांगदा ... ५३. असौ महेन्द्रादिसमा ५४ ज्याघातलेखे ५९.

संभाव्यभर्तारं ५. अथ्याप्यचान्यः पत्रंपनमा वर्तमनो परस्य ... समानतमसामनि ५७. अनेन सार्द्धं ५८ प्रतोषमालिनासायस ६०.

अथोरगाख्यस्य ६०. पांड्योयमंसार्पितलंब ६१. विंध्यस्य संस्तंभयिता ६२. अस्त्रं हराप्राप्तवतापि ६३. अनेनपाणौ ६४.

ताम्बूलवल्लीं ६५. उरगेव ... ६६. इति कायस्थ एकिया हेरुअनुनयकायनुसुरजितेर सोजोई श्वर है महादेव तिसे

स्वल्प [illegible] दर्भाधिपतेः ६७. संचारिणी ६८. तस्यां स्वोत्थाः स्वरुद्धे ६९. तं प्राप्य सर्वावयवा ७०. तस्मिन्नभावे ७१. इक्ष्वाकुवंश्यः ककुत्स्थ ७२.

महेन्द्रमास्थाय ७३. यस्तवत्सालकला ७४. जातः कुले तस्य ७५. यस्मिन्महीं शासति ७६. पुरा रघुस्तस्य पदं प्रशास्य ७७. आहुरु अमंद्रीलु ७८.

असौ कुमारस्तम ७९. उल्लेक्कांगनावयसा ८०. ततः सुनंदावचनाव ८१. सायूतिनस्मिन्नव ८२. तथागतायां ८३ सा सुप्रयो गोरं ८४.

र.वं.पं.
३८

38

परीजनवतितानांयादयोर्क्षीप्रतानांवत्लयमखिविक्ष्यप्रकुदांतेसमोच ७६।
श्रयाविधिमवसायशास्त्रहृष्टंदवस्नुवेताचितमचितादिप॥
दशाशाश्लपविचिता नेत्रपवेशःदितिसमा॥
कियन्मात्रंनलीव जमगात्स्वयंवरस्थम॥७७इतिश्रीरघुवं॥
प्रजानुदर्बुनरापिप शेमहाकाव्येकविराजकालिदासकृतौपंच॥
ईदृशीकिंमवस्यातेन मः॥सर्गः५॥राम॥राम॥राम॥राम॥राम॥
हिसर्वेभवादृशाःवे राम॥राम॥राम॥राम॥राम॥राम॥राम॥
पिवर्षतिपर्जन्यप्र राम॥राम॥राम॥राम॥राम॥
विनाः३ड्डुमाः अस्माकमकिंदानां राम॥राम॥राम॥राम॥प॥राम॥
कोमोदते किमा पूर्वयवेपिसंशाय.२राजन्केनक
र्त्रयकावातीकांप यथारामिसर्वेन्त्रयमुमाः होजाः
थःसजःइति मेचकुर:
वशवान्स्य्रवयितावा श्रआग्य हरेत्रमाहरेमयिनायांजिविंदवः३लक्ष्यंलक्ष्यएनलक्ष्यं,मत्ता श्रदंजिनः
जलपिवर्षचमेह दत्तानिभोजराजेनजानुदध्नुप्रभावपातरध३
निशाचेवाशाकपचजिस्वगहे अच्युतीनाप्रवा सीचसवारियात्येमोदजेर अहन्यहनिध्रतानिगन्द्वंजियमर्मदिदेशाबाःजीवंजि
निर्विभिन्ना दर्शः यावियभिर्नेप्येकोस्मनि

किंजीर्तिकिमसौमितासु [illegible]
यस्ववकियमाणः [illegible]
[illegible]

सतत्रमंचेषु विमानकल्पेषु ... सिंहासनस्थान्नृपतीन्नपश्यत् ... ॥१॥

ॐ श्रीगणेशाय नमः ॥ स तत्र मंचेषु मनोज्ञवेशान्सिंहासनस्थानुपचारवत्सु । वैमानिकानाम्मरुतामपश्यदाकृष्टलीलान्नरलोकपालान् ॥१॥ रतेर्गृहीतानुनयेन कामं प्रत्यर्पितस्वांगमिवेश्वरेण । काकुत्स्थमालोकयतां नृपाणां मनो बभूवेन्दुमतीनिराशं ॥२॥ वैदर्भनिर्दिष्टमसौ कुमारः क्लृप्तेन सोपानपथेन मंचं । शिलाविभंगैर्मृगराजशावस्तुंगं नगोत्संगमिवारुरोह ॥३॥ परार्घ्यवर्णास्तरणोपपन्नमासेदिवान्रत्नवदासनं सः । भूयिष्ठमासीदुपमेयकान्तिर्मयूरपृष्ठाश्रयिणा गुहेन ॥४॥ तासु श्रिया राजपरंपरासु प्रभाविशेषोदयदुर्निरीक्ष्यः । सहस्रधात्मा व्यरुचद्विभक्तः पयोमुचां पंक्तिषु विद्युतेव ॥५॥

विमानचारिणां देवतानां ... लीलायेषां तान् ... =

पर्यंकेषु ... यथा ... =

राजपरंपरासु राजपंक्तिषु =

... पयोमुचां मेघानां पंक्तिषु विद्युता इव ... =

नेत्रव्रजाः पौरजनस्य तस्मिन्विहाय सर्वान्नृपतीन्निपेतुः मदोत्कटे रेचितपुष्पवृक्षा गन्धद्विपे वन्य इव द्विरेफाः ॥ ६ ॥

३९

र.वं.ष.

सिंहासनेषु

तेषां महार्हासनसंस्थितानामुदारनेपथ्यभृतां स मध्ये रराज धाम्ना रघु
सूनुरेव कल्पद्रुमाणामिव पारिजातः ॥ ७ ॥ अथ स्तुते बन्दिभिरन्वयज्ञैः
सोमार्कवंश्ये नरदेवलोके संचारिते चागुरुसारयोनौ धूपे शि
खावासितकेतुमाले ॥ ८ ॥ पुरोपकण्ठोपवनाश्रयाणां शिखण्डिनामु
द्धतनृत्यहेतौ प्रध्मातशङ्खे परितो दिगन्तांस्तूर्यस्वने मूर्छति मं
गलार्थे ॥ ९ ॥ मनुष्यवाह्यं चतुरस्रयानमध्यास्य कन्या परिवार
शोभि । विवेश मंचान्तरराजमार्गं पतिंवराक्लृप्तविवाहवेषा ॥ १० ॥
तस्मिन्विधानातिशये विधातुः कन्यामये नेत्रशतैकलक्ष्ये ।

सूर्यचन्द्र वंशे ... लोके ... धूपे समुत्सर्पति वैजयन्तीः = पताकाः ... जनयति सति =

पुनः कथंभूते तूर्यस्वने

इति विशे ... प्राक् ॥

पतिंवरा कॢप्तविवाहवेषा ... मनुष्यवाह्यं परिवारशोभि चतुरस्रयानमास्थाय ... अन्वयज्ञैः बन्दिभिः सोमार्कवंश्ये नरदेवलोके स्तुते सति
... सारयोनौ धूपे ... संचारिते सति ... वैजयन्तीः समुत्सर्पति सति पुरोपकण्ठोपवनाश्रयाणां शिखण्डिनामुद्धतनृत्यहेतौ प्रध्मातशङ्खे मङ्गलार्थे
तूर्यस्वने परितः दिगन्तान् ... मूर्छति सति इति विशेषणस्यान्वयः ॥

निवर्तितैः करतोर्नरेन्द्रादेहैः स्थिताः केवलमासनेषु ११ तां
प्रत्यभिव्यक्तमनोरथानां महीपतीनां प्रणयाग्रदूत्यः प्रवाल
शोभा इव पादपानां शृंगारचेष्टा विविधा बभूवुः १२ कश्चित्क
राभ्यामुपगूढनालमालोलपत्राभिहतद्विरेफं रजोभिरंतःपरिवे
शशोभि लीलारविंदं भ्रमयांचकार १३ विस्रस्तमंसादपरो विला
सी केयूरकोटिक्षतजातसंगं प्रवालमुत्क्षिप्य यथाप्रदेशं निना
१३ य साचीकृतचारुवक्त्रः १४ कुंचितयाताग्रतलेन कश्चित्केयूर
पदाध्वजलाञ्छनेन दीप्तांगुलीयप्रभयानुदग्धा नदी रया

कश्चित्कराभ्यां लीलारविंदं भ्रमयांचकार ... कुर्वाणो ... अभिप्रायः = ४

प्रालंबोत्क्षेपणेन ... अभिप्रायः ... किंचित् ... अभिप्रायः = २

नवर्नमाक्षरलेषवाहंगलेषि आमिहुतिन्यामिप्रायः लेरव केयंस्रपक्षलकेहुमीमत्यं मिप्रायः =३ ग्रहंतया सहैवंक्रीडितेऽद्दतिन्यामिप्रायः अतचातुर्यं अपंकुपुरुषः अंडुमपमिमायः १

र.व.ष. मासमलीलमक्षान् १४ आकुंचिताग्रांगुलिना ततोऽन्यः किं

ध. चित्समावर्जितनेत्रशोभिः रक्तांकुसंटत्तनखप्रभेण पादेन हैं है

मं विललेखपीठं १५ निवेश्यवामंभुजमासनार्द्धेनेगाढांगदे

५० पार्श्वेनियीडिमिन कश्चिद्विवृत्तत्रिकभिन्नहारः सुहृत्समाभा ५७

षणतत्परोऽभूत् १६ विलासिनीविभ्रमदंतपत्रमापांडुरंकेतकव

र्हमन्यः प्रियानितंबोचितसन्निवेशैर्विपाटयामास

युवानखाग्रैः १७ कश्चिद्यथाभागमवस्थितेपि स्वसन्निवे

शाद्व्यतिलंघितीव वज्रांशुगर्भांगुलिरंध्रमेकं व्यापामास

रया

वेत्स्वक्षिमतीत्वदंते जीवन्पुनःशश्वदुपप्लवेभ्यःप्रजाःप्रजानाथपितेव
पासि॥४८॥ अथैकधेनोचंडाद्गुरोः कृशानुप्रतिमाद्बिभेषि॥ शक्योस्य
मन्युर्भवताविनेतुंगाःकोटिशःस्पर्शयताघटोध्नीः॥४९॥ तद्रक्षकल्या
णपरंपराणांभोक्तारमूर्जस्वलमात्मदेहम्॥ महीतलस्पर्शनमात्र।
भिन्नमृद्धंहिराज्यंपदमैन्द्रमाहुः॥५०॥ एतावदुक्त्वाविरतेमृगेन्द्रेप्रतिस्व
नेनास्यगुहागतेनशिलोच्चयोपिक्षितिपालमुच्चैः॥ प्रीत्यातमे

र॰ हि॰
५८

51

गार्थमथानेव ॥५॥ निशम्य देवारिचरस्य वाचं मनस्य घोरैः शुरप्युवाच ॥ येन्वात

विनाशा । प्रसिद्धः । रक्षति ६

दप्यासितकाननराजराजिरीत्स्यमाणः स्मतरोस्यालवः ॥५२॥ स्वतान्किन्नचाय

७ वृत्त ३ उन्नतेः ८ तत्रव ३ शाद्व ... वाचे ८ प्रसिद्धः ९ तस्मतेत्रशोव ११ स्पर्श २ स्परीजा है तिर्यक्षि केस ने १० किं

तद्दमुदयैः तवेम्यशाकौ भुवनेषु रूढः ॥ राज्यान्नकिंतद्वियरीतवृत्तेः प्राणौ

निरस्यामलिनीकृता ; प्राणाः
यस्यते मया १३

रूपकोशमलीमसेवी ॥५३॥ कथं वशाकेवानन्नयोमम सवैः विशाणनादस्यपयास्ति

नंदिनी नंद्धनां

नीनो दुमामनून्नामसरभेववेहि ॥ लच्छैजसार्नवप्रहृतेनयोस्यो ॥५४॥ सेयेसदोह्रार्पणानि

कुपेणन्मायामयामि त्वयि तेभवन्तः नपारणाद्धिहंतैव कमैवदत्तुम् अमुनेः किं

याथीः ॥५५॥ भवाननपीटयवन्नवैतिमह्राद्रियन्तस्तवदेवदारौ ॥ स्यान्नतेनियोक्तय

ता४

स्वपाणां श्रु गारचेष्टा नंतर — इतिवृत्तं वंशाश्चेति० प्रगल्भोत्तम वंशोयस्याःसा वर्तित — प्रतिहारस्य रक्षीद्वारपाली सुनंदा — स — निकट

ततो नृपाणां श्रुतवृत्तवंशा पुंवत्प्रगल्भा प्रतिहाररक्षी प्राक्संनिकर्षं मगधेश्वरस्य ।

रंडमारीं — रक्षकावर्ति — शरणेउन्मुखाः शर्ते — ऽ

नीत्वा कुमारीमवदत्सुनंदा १९ असौ शरण्यः शरणोन्मुखानामगाध

सत्वो मगधप्रतिष्ठः राजा प्रजारंजनलब्धवर्णः परंतपो नाम यथार्थनामा ।

२० कामं नृपाः संति सहस्रशोन्ये राजन्वतीमाहुरनेन भूमिं नक्षत्रता

राग्रहसंकुलापि ज्योतिष्मती चंद्रमसैव रात्रिः २१ क्रियाप्रबंधादयमध्वरा

ह णामजस्रमाहूतसहस्रनेत्रः शच्याश्चिरं पांडुकपोललंबान्मंदारशून्या

नलकांश्चकार २२ अनेन चेदिच्छसि गृह्यमाणं पाणिं वरेण्येन कुमार

प्रवेशे प्रासादवातायनसंश्रितानां नेत्रोत्सवं पुष्पपुरांगनानां २३

र.वं.ष.
५२
92

एवंतयोक्तेतमवेक्ष्यकिंचिद्विस्रंसिदूर्वांकमधूकमाला ऋजुप्रणामक्रिययैव
तन्वीप्रत्यादिदेशैनमभाषमाणा २४ तांसैववेत्रग्रहणेनियुक्ताराजां॥
तरंराजसुतांनिनाय समीरणोत्थेवतरंगलेखापद्मांतरंमानसराजहं
सीं २५ जगादचैनामयमंगनाथः सुरांगनाप्रार्थितयौवनश्रीः विनीत
नागःकिलसूत्रकारैरैंद्रंपदंभूमिगतोपिभुंक्ते २६ अनेनपर्यासयता
श्रुबिंदून्मुक्ताफलस्थूलतमान्स्तनेषु प्रत्यर्पिताःशत्रुविलासिनी॥
नामुन्मुच्यसूत्रेणविनैवहाराः २७ निसर्गभिन्नास्पदमेकसंस्थमस्मि
न्द्वयंश्रीश्चसरस्वतीच कांत्यागिरासूनृतयाचयोग्यात्वमेवकल्याणि॥
तयोस्तृतीया २८ अथांगराजादवतार्यचक्षुर्याहीतिजन्यामवदत्कु

ततः परं दुःप्रसहं परेषां नृपं नियुक्ता प्रतिहारभूमौ निदर्शयामास विशे
षदृश्यमिंदुं नवोत्थानमिवेंदुमत्यै ३० अवंतिनाथोयमुदग्रबाहुर्वि
शालवक्षास्तनुवृत्तमध्यः आरोप्य चक्रभ्रममुष्णतेजास्त्वष्ट्रेव
यत्नोल्लिखितो विभाति ३१ अस्य प्रयाणेषु समग्रशक्तेरग्रेसरै
र्वाजिभिरुत्थितानि कुर्वंति सामंतशिखामणीनां प्रभाप्ररोहास्तम
यं रजांसि ३२ असौ महाकालनिकेतनस्य वसन्नदूरे किल चंद्र
मौलेः तमिस्रपक्षेपि सह प्रियाभिर्ज्योत्स्नावतो निर्विशति प्रदो
षान् ३३ अनेन यूना सह पार्थिवेन रंभोरु कच्चिन्मनसो रुचिस्ते

इंदुमतीकृते दुःसहं शत्रूणां अधिकृता द्वारभूमौ दर्शयामास सौंदर्यं द्योतितं

अतिशयेन दर्शनीयं = शोभनं प्रियदर्शनं द्योतितं

अवंतिनाथस्य पुरःसराः सामंतानां मस्तकस्थिताः [illegible] असौ अवंतिनाथः

र.वं.
दि.

43

सिप्रातरंगानिलकंपितासु विहर्तुमुद्यानपरंपरासु ३३ तस्मिन्नभिद्यो
तितबंधुपद्मे प्रतापसंशोषितशत्रुपंके बबंध सा नोत्तमसौकुमा
र्या कुमुद्वती भानुमतीव भावं ३४ तामग्रतस्तामरसांतराभामनू
पराजस्य गुणैरनूनां विधाय सृष्टिं ललितां विधातुर्जगाद भूयः सु
दतीं सुनंदा ३५ संग्रामनिर्विष्टसहस्रबाहुरष्टादशद्वीपनिखातयू
पः अनन्यसाधारणराजशब्दो बभूव योगी किल कार्तवीर्यः ३६
अकार्यचिंतासमकालमेव प्रादुर्भवंश्चापधरः पुरस्तात् अंतःशरीरे
ष्वपि यः प्रजानां प्रत्यादिदेशाविनयं विनेता ३७ ज्याबंधनिष्पंद

विकर्मं अपि

श्रीदिक

मायामो वां बंधनेन

भुजेन यस्य विनिश्वसद्वक्त्रपरंपरेण कारागृहे निर्जितवासवेन लंके
श्वरेणोषितमाप्रसादात् ३९ तस्यान्वये भूपतिरेष जातः प्रतीप इत्या
गमवृद्धसेवी येन श्रियः संश्रयदोषरूढं स्वभावलोलेत्ययशः प्रमृष्टं ४०
आयोधने कृष्णगतिं सहायमवाप्य यः क्षत्रियकालरात्रिं धारां शितां
रामपरश्वधस्य संभावयत्युत्पलपत्रसारां ४१ अस्यांकलक्ष्मीर्भव दी
र्घबाहोर्माहिष्मतीवप्रनितंबकांचीं प्रासादजालैर्जलवेणिरम्यां रे
वां यदि प्रेक्षितुमस्ति कामः ४२ तस्याः प्रकामं प्रियदर्शनोपि न स
क्षितीशो रुचये बभूव शरत्प्रमृष्टांबुधरोपरोधः शशीव पर्याप्तकला

१·द्वि· साशूरसेनाधिपतिंसुषेणमुद्दिश्यदेशांतरगीतकीर्तिं आचारशु
४४ द्धोभयवंशदीपंशुद्धांतरक्षाजगदेकुमारी ४४ नीपान्वयःपार्थि
५५ वएषयज्वागुणैर्यमाश्रित्यपरस्परेण सिद्धाश्रमंशांतमिवैत्यसत्वै
र्नैसर्गिकोप्युत्ससृजेविरोधः ४५ यस्यात्मगेहेनयनाभिरामा
कांतिर्हिमांशोरिवसन्निविष्टा हर्म्याग्रसंरूढतृणांकुरेषुतेजो
विषह्यंरिपुमंदिरेषु ४६ यस्यावरोधस्तनचंदनानांप्रक्षालना
द्वारिविहारकालेकलिंदकन्या मथुरांगतापिगंगोर्मिसंसक्त
जलेवभाति ४७ त्रातेनतार्क्ष्यात्किलकालियेनमणिंविसृष्टंय

मुद्रैकमायः वक्षस्थलव्यापिहवंदधानः सकोस्तुभं हि पयतीवविस्तु ४९ संभा
व्यभान्तिरमसंयुवानांमदुभवालोत्तरपुष्पशाखे हृंदावनेचेत्ररथादनूने निर्वि
ष्टपतंसहृदरियोवनस्थीः ५० अथास्यचांभंष्टपतोद्विनानिपेलेयनहानिषि
लानलानिकलाविनोमाहषिपष्पमत्यंहांनासगोभवर्दूनकंदराह ५१ स्वपंत
मावनीमनोज्ञनाभिः साध्वन्यगाइन्वव यूभविडी महीधरंमार्गवशाद्डपेतं हो
नवहासागवश्याम्नितीव ५२ अपांगदाक्षिष्यरंजंभजिष्णा हेमांशुनामक
लिंगनाथं अ्रासेदुषींसादितशत्रुपक्षं वालामवालेंदुमरवींबभाषे ५३

असौ महेन्द्राद्रिसमानसारः पतिर्महेन्द्रस्य महोदधेश्च यस्यान्त्वरा।
सैन्यगजच्छलेन यात्रासु यातीव पुरो महेन्द्रः ५३ ज्याघातलेखे सुभु।
जो भुजाभ्यां विभर्ति यश्चापभृतां पुरोग रिपुश्रियः सांजनवाष्पसेके
वंदीकृताया इव पद्धती द्वे ५४ यमात्मनः सद्मनि संनिकृष्टो मंद्र।
ध्वनित्याजितयामतूर्यः प्रासादवातायनदृश्यवीचिः प्रबोधयत्य।
र्णव एव सुप्तम् ५५ अनेन सार्द्धं विहरांबुराशेस्तीरेषु तालीवनम।

मरेषु द्वीपांतराणीत्तलवेगपुष्पेरप्याकरी खिदलवामरुद्भिः ५६ प्रलोभितात्प्याकृ
तिलोभनीयाविदर्भराजावरजानयेव तस्मादपावर्जतद्दूरकृष्टानी त्येलक्ष्मीः
प्रतिरूपदेवान् ५७ अथोरगाख्यस्यपुरस्यनाथंदौवारिकीदेवसरूपमेत्य
इतश्चकोराक्षिविलोकयेतिनागांगनाभ्योनिजगादभोज्यां ५८ पांड्योयमं
सार्पितलंबहारः क्लृप्तांगरागोहरिचंदनेन आभातिबालातपरक्तसानुः स
निर्झरोद्गारइवाद्रिराजः ५९ विंध्यस्यसंस्तंभयितामहाद्रेर्निःशेषपीतोज्झित
सिंधुनाथः प्रीत्याश्वमेधावभृथार्द्रमूर्तेः सौस्नातिकोयस्यभवत्यगस्त्यः ६०
अस्त्रंहरादाप्तवताडरापंयेनेन्द्रलोकावजयायदृप्तः पुनाजनस्थानविमर्दशंकीसंधा

ॐ
श्रि
र
घु
व
शं
टि
का
स
हि
त
प०

र॰वं॰
४६

अनेनपाणौविधिवद्गृहीतामहाकुलीनेनमहीवगुर्वी रत्नानुविद्धार्णवमेख
लायादिशः सपत्नीभवदक्षिणस्याः ६२ तांबूलवल्लीपरिनद्धपूगास्वेला
लतालिंगितचंदनासु तमालपत्रास्तरणासु रंतुं प्रसीदशश्वन्मलयस्थलीषु
६३ इंदीवरश्यामतनुर्नृपोसौत्वंरोचनागौरशरीरयष्टिः अन्योन्यशोभापरिवृद्धयेवांयो
गस्तडित्तोयदयोरिवास्तु ६४ स्वसुर्विदर्भाधिपतेस्तदीयोलेभेन्तरंचेतसिनोपदेशः
दिवाकरादर्शनबद्धकोशेनक्षत्रनाथांशुरिवारविंदे ६५ संचारिणीदीपशिखेव
रात्रौयंयंव्यतीयायपतिंवरासा नरेंद्रमार्गाट्टइवप्रपेदेविवर्णभावंससभूमिपालः ६६
तस्यांरघोःसूनुरुपस्थितायांवृणीतमांनेतिसमाकुलोभूत् वामेतरःसंशयमस्य

४६

बाहुः केयूरवंशयोक्षसितैर्नदैर्नदं ६७ तं प्राप्य सर्वावयवानवद्यं व्यावर्ततान्योपग
मात्कुमारी न हि प्रफुल्लं सहकारमेत्य वृक्षांतरं कांक्षति षट्पदाली ६८ तस्मि
न्समावेशितचित्तवृत्तिमिंदुप्रभामिंदुमतीमवेक्ष्य प्रचक्रमे वक्तुमनुक्रमज्ञा
सविस्तरं वाक्यमिदं सुनंदा ६९ इक्ष्वाकुवंश्यः ककुदं नृपाणां ककुत्स्थ
इत्याहितलक्षणोऽभूत् काकुत्स्थशब्दं यत उन्नतेच्छाः श्लाघ्यं दधत्युत्तरकोशले
न्द्राः ७० महेंद्रमास्थाय महोक्षरूपं यः संयति प्राप्तपिनाकिलीलः चकार बा
णैरसुरांगनानां गंडस्थलीः प्रोषितपत्रलेखाः ७१ ऐरावतास्फालनविश्लथं
यः संघट्टयन्नंगदमंगदेन उपेयुषः स्वामपि मूर्त्तिमग्र्यामर्द्धासनं गोत्रभिदो
धितस्थौ ७२ जातः कुले तस्य किलोरुकीर्त्तिः कुलप्रदीपो नृपतिर्दिलीपः अ

निष्टदेकोऽशातनकेतवेष्टकाम्यस्य याविनिहतनयेन ः ७३ यस्मिन्महीं शासति वा
णिनीनां निद्रां विहारार्द्धपथे गतानां वातोपि नास्रंसयदंशुकानि को लंबयेदाह
रणाय हस्तं ७४ ध३ त्रोरघुस्तस्य पदं प्रशास्ति महाक्रतोर्विश्वजितः प्रयोक्ता च
तुर्दिगावर्जितसंभृतां यो मृत्पात्रशेषामकरोद्विभूतिं ७५ आरूढमद्रीनुद
धीन्वितीर्णं भुजंगमानां वसतिं प्रविष्टं ऊर्ध्वं गतं यस्य न चानुबंधि यशः परि
छेत्तुमियत्तयालं ७६ असौ कुमारस्तमजोनुजातस्त्रिविष्टपस्येव पतिं जयं
तः गुर्वीं धुरं यो भुवनस्य पित्रा धुर्येण दम्यः सदृशं बिभर्त्ति ७७ कुलेन का
न्त्या वयसा नवेन गुणैश्च तैस्तैर्विनयप्रधानैः त्वमात्मनस्तुल्यममुं वृणीष्व रत्नं समा
गच्छतु कांचनेन ७८ ततः सुनंदावचनावसाने लज्जां तनूकृत्य नरेन्द्रकन्या दृ

(interlinear/marginal glosses: नय; हे इंदुमति; शरीरलावण्यतया; कुलशीला; नम्रतायधाने; मिलतु; इदीयं; अनंतरं; सुनंदावचनस्यांते; सलज्जता; इंदुमती)

कांचनरत्नयोरिवयुवयोः संगमोस्तु
...नानुरूपता...

ष्ट्या प्रसादामलया कुमारं प्रत्यग्रहीत्संवरणस्रजेव ॥ ७९ ॥ सा यूनि तस्मिन्नभिलाषबं

धं शशाक शालीनतया न वक्तुं । रोमांचलक्ष्येण स गात्रयष्टिं भित्वा निराक्रामदर

ालकेश्याः ॥ ८० ॥ तथागतायां परिहासपूर्वं सख्यां सखी वेत्रभृदाबभाषे । आर्ये व्र

जामोन्यत इत्यथैनां वधूरसूयाकुटिलं ददर्श ॥ ८१ ॥ सा चूर्णगौरं रघुनंदनस्य

धात्रीकराभ्यां करभोपमोरूः । आसंजयामास यथाप्रदेशं कंठे गुणं मूर्तमिवानुरा

गं ॥ ८२ ॥ तया स्रजा मंगलपुष्पमय्या विशालवक्षःस्थललंबया सः । अमंस्त कं

ठार्पितबाहुपाशां विदर्भराजावरजां वरेण्यः ॥ ८३ ॥ शशिनमुपगतेयं कौमुदी मेघ

मुक्तं जलनिधिमनुरूपं जह्नुकन्यावतीर्णा । इति समगुणयोगप्रीतयस्तत्र

र.वं.घ
५८

सर्वाणि कदुष्पाणां मेकवाक्यं विवव्रुः ८४ प्रमुदितवरपक्षमेकतस्तत्क्षि

तिपतिमंडलमन्यतो वितानम् उषसि सरः श्रव प्रफुल्लपद्मं कुमुदवनप्रतिप

न्ननिद्रमासीत् ८५ इति हुवं होकृा विका सहू जा

स रोना घ्रःस द अथो यथवत्रासशोनयुक्तास्कंदेन

साक्षादिव देवसेनां स्वसारमादाय विदर्भराजः पुरप्रवेशाभिमु

खोवभूव ८ सेनानिवेशान्वृथिवीक्षितोपि जग्मुर्विभातग्रहमंददद

भासः भोज्यास्मति कार्थमनोरथत्वात् दूयेषुवेशाधुबसाम्यसस्वा २

सानिष्ययेगाक्रिलतत्रंषगाख्याः स्वयंवरतोमकृताग्रभावः काऊन्यमुहिस्य स

ॐ नारायणाय नमः

निवेशी शिविरस्था
उत्पन्नरः

भोज्यांप्रति
चार्थ्यमनोरथोयेवांय
तत्त्वायमनोरथ्यस्य तप्व
दूयेषुवेशोवुसाम्यस्या
वर्तते

सानी ध्ययेणारू
स्वयंवरे इंदुमत्याः
स्वयंवरे त्रिवृकृता अभावोवर्तते
नाशोवर्तते
अत्रं निमित्तं वि थाय

मकीर्णाति त्र्ययियाप्राप्ति अभिनवा
तिमगतोय वारणानिद्युकरणाति
गंधलजेणी मास्यादीनियमित्रात

इड्स्यायु यंयनुरिवृष मोतितानि प्रीताविनोरणा
निति सामंकानि चिद्धानियमित्रं . त
श्रजं इंडमतीसह

नावत्यकोभिनवोप्यचारुसिन्नंगुथयोमितनोरणेकं वरः सवधासहराजा

धजबोपयानिवृतितमु स्वयस्मि
तमत्रजेयया लोकतेद योनोते सालां प्रासकानां हस्त्यादि

मार्गेशापदेष्वजबोयनिवारितेषुसं धत्तनकृतदालोकनतत्पराणांसोयेषु

चामीकरस्यजालाः गवाक्षा हैमप्रकारे मु
पुररम णीनां

चामीकरजालवत्सु वभरवृत्तिस्यपुरस्तुंदरीणां मकात्यकार्याणिविचेष्टि

वायोराणी
लिखि स्वरण समार्गं सोवं गई सोतोता त्रिया
उहृष्टनेनमोचनेनवाताः ३ कीर्णाः मु लायस्मात्

तानि ५ आलोकमार्गसहमावृजंत्या कयाचिद्वेष्टनवांतमल्यः वधु ॥

न चिंतितपव आलोकय
गहीतोपि केशकलापः

नसभाविनपवंनोवृकेरेणरुद्धोपिहिकेशपाशः ६ प्रसाधिकालविता

प्रसाधिकयात्रलंकारकालंपयित्रात्तेवितगृहीते

ऽऽ आ हवा ती ने हवेनवेगः पल्ला नेव उत्त्ताव काला ग ति गमी ता ऽऽ जवा

आलतं केसर लंकारसरं संकानि चिद्धानि यस्तं
यताद्दर्थापदवीपद्धति
ततानचकार

मग्रपाद माक्षिप्यकाचिद्ववरागमेव उत्सृष्टलीलागतिरागवाक्षादलक्तकांकांपदवींतनान ७ विलोचनंदक्षिणमंजनेनसंभाव्यतद्वंचितवामनेत्रा तथैववातायनसंनिकर्षंययोशलाकामपराबहंती ८

नेत्र
अलकाल

तेनअंजनेन वंचितं उमितं सहसेव गवाक्षसमीपं जगाम अंजनशलिकां अपराप्यी पारयंतीताति
त्यक्तं वामनेत्रंयस्या:

र.वं.स.
५९

45

जालांतरप्रेषितदृष्टिरन्या प्रस्थानभिन्नां न बबंध नीवीम् नाभिप्रविष्टा-
भरणप्रभेण हस्तेन तस्थाववलंब्य वासः ९ अर्धाचिता सत्वरमुत्थितायाः
पदे पदे दुर्निमिते गलंती कस्याश्चिदासीद्रशना तदानीं यंगुष्ठमूलार्पितसूत्रशे-
षा १० तासां मुखैरासवगंधिगर्भैर्व्याप्तांतराः सांद्रकुतूहलानां विलोल-
नेत्रभ्रमरैर्गवाक्षाः सहस्रपत्राभरणा इवासन् ११ ता राघवं दृष्टिभिरा-
पिबंत्यो नार्यो न जग्मुर्विषयांतराणि तथा हि शेषेंद्रियवृत्तिरासां सर्वात्म-
ना चक्षुरिव प्रविष्टा १२ स्थाने वृता भूपतिभिः परोक्षैः स्वयंवरं साधुममंस्त

तला
भोक्त्वा पद्येवनारायणमम न्यथासौ लभेत कां तंकयमात्मनस्तं १३ एवमरेणमष्ट ।
दशीयेशाभेनवेदिदं हृदयमयोजयिष्यत अस्मिन्नूयेहपविमयानयतेः पत्तुःप्रजानां
वितथ्योमविष्यत १४ इति स्मरेतेन्नमिमावभ्रतांयास्तां सहदेवेष्णुतयादिवाला ।
गतेयमात्मप्रतिरूपमेनेमनोहिजन्मानरसंगतिज्ञे १५ इत्युक्ताः पौरवपरमुखोय्यः
श्रणवन्कथाःश्रोत्रसुवोः कुमारः उद्वाहुः सितंमेगतसंविधापिः सेवेयिनः समस्त ।
मासमसाद १६ ततोवतीर्य्येभकेरेणुकायाः सकामरूपेष्वरदत्तहस्तः वैरभं निर्हि
छमयोविवेशनागमनां सीवचनफमेतः १७

र.वं.स. ६. महार्हसिंहासनसंस्थितोसौ सरत्नमर्घ्यं मधुपर्कमिश्रं भोजोपनीतं च दुकूलयुग्मं
जग्राह सार्धं वनिताकटाक्षैः १८ दुकूलवासाः स वधूसमीपं निन्ये विनीतैरवरोध
रक्षैः वेलासकाशं स्फुटफेनपंक्तिं नवैरुदन्वानिव चंद्रपादैः १९ तत्रार्चितो भोजप
तेः पुरोधाहुत्वाग्निमाज्यादिभिरग्निकल्पः तमेव चाधाय विवाहसाक्ष्ये वधूवरौ सं
गमयांचकार २० हस्तेन हस्तं परिगृह्य वध्वाः स राजसूनुः सुतरां चकासे अनंतरा
शोकलताप्रवालं प्राप्येव चूतः प्रतिपल्लवेन २१ आसीद्वरः कंटकितप्रको
ष्ठः स्विन्नांगुलिः संववृते कुमारी तस्मिन्द्वये तत्क्षणमात्मवृत्तिः समं विभक्तेव मनो
भवेन २२ तयोरुपांतप्रविचारितानि क्रियासमापत्तिमुकातराणि ह्रीयंत्रणा

मानशिरेमनोज्ञामन्योन्यलोलानिविलोचनानि २३ प्रदक्षिणप्रक्रमणात्कृशानो।
रुदर्चिषस्तन्मिथुनंचकासे मेरोरुपांतेष्विववर्तमानमन्योन्यसंसक्तमहस्त्रियामं ।
२४ नितंबगुर्वीगुरुणाप्रयुक्तावधूर्विधातृप्रतिमेनतेन चकारसामत्तचकोरनेत्राल
ज्जावतीलाजविसर्गमग्नौ २५ हविःशमीपल्लवलाजगंधिःपुण्यःकृशानोरुदियाय
धूमः कपोलसंसर्पिशिखःसतस्यामुहूर्तकर्णोत्पलतांप्रपेदे २६ तदंजनक्लेदसमाकुला
क्षंप्रम्लानबीजांकुरकर्णपूरम् वधूमुखंपाटलगंडलेखमाचारधूमग्रहणाद्बभूव २७
तौस्नातकैर्बंधुमताचराज्ञापुरंध्रिभिश्चक्रमशःप्रयुक्तं कन्याकुमारौकनकासनस्था
वार्द्राक्षतारोपणमन्वभूतां २८ मस्यंस्वसमं मौंजिकुलप्रदीपः संपाद्यपाणिग्रहणंस

र॰वं॰स॰
६१

61

राजामहीपतीनांपृथगर्हणार्थंसमादिदेशाधिकृतानधिश्रीः २९ लिंगैर्मुदःसंवृतवि
क्रियास्तेह्रदाःप्रसन्नाइवगूढनक्राः वैदर्भमामंत्र्ययुयुस्तदीयांप्रत्यर्प्यपूजामुपदाछलेन ३॰
सराजलोकःकृतपूर्वसंविदारंभसिद्धौसमयोपलभ्यं आदास्यमानःप्रमदामिषंतदावृत्यपंथा
नमजस्यतस्थौ ३१ भर्त्तापितावत्क्रथकैशिकानामनुष्ठितानंतरजाविवाहः सत्वानुरूपाहर
णीकृतश्रीःप्रास्थापयद्राघवमन्वगाच्च ३२ तिस्रस्त्रिलोकीप्रथितेनसार्द्धमजेनमार्गेवस
तीरुषित्वा तस्मादपावर्त्ततकुंडिनेशःपर्वात्ययेसोमइवोष्णरश्मेः ३३ प्रमन्यवःप्रागपि [illegible]
कोशलेन्द्रेप्रत्येकमात्तस्वतयाबभूवुः अतोनृपाश्चक्षमिरेसमेताःस्त्रीरत्नलाभंननदात्मज
स्यक्षतमुद्वहंतंपथिभोजकन्यांरुरोधराजन्यगणःसदृप्तः बलिप्रदिष्टांश्रियमाददानंत्रैविक्रमं
पं॰

राम
६१

तस्याः स रक्षार्थमनल्पयोधमादिश्य पित्र्यं सचिवं कुमारः प्रत्यग्रहीत्पार्थिववाहिनीं तां भागी
रथीं शोण इवोत्तरंगः ३६ पत्तिः पदातिं रथिनं रथेशस्तुरंगसादी तुरगाधिरूढं यन्ता गज
स्याभ्यपतद्गजस्थं तुल्यप्रतिद्वंद्वि बभूव युद्धं ३७ नदत्सु तूर्येष्वविभाव्यवाचो नोदीरयं
ति स्म कुलोपदेशान् बाणाक्षरैरेव परस्परस्य नामोर्जितं चापभृतः शशंसुः ३८ उत्थापितः
संयति रेणुरश्वैः सांद्रीकृतः स्यंदनेमिचक्रैः विस्तारितः कुंजरकर्णतालैर्नेत्रक्रमेणोपरुरोध सू
र्यं ३९ मत्स्यध्वजा वायुवशाद्विदीर्णैर्मुखैः प्रवृद्धध्वजिनीरजांसि बभुः पिबंतः परमार्थमत्स्याः
पर्याविलानीव नवोदकानि ४० रथो रथांगध्वनिना विजज्ञे विलोलघंटाक्वणितेन नागः
स्वभर्तृनामग्रहणाद्बभूव सांद्रे रजस्यात्मपरावबोधः ४१ आवृण्वतो लोचनमार्गमाजौ र
द्विप ५२ जोंधकारस्य विजृंभितस्य शस्त्रक्षताश्वद्विपवीरजन्मा बालारुणोऽभूद्रुधिरप्रवाहः ४२ सच्छि
न्नमूलः क्षतजेन रेणुस्तस्योपरिष्टात्पवनावधूतः अंगारशेषस्य हुताशनस्य पूर्वोत्थितो धू

रघु ५४

र॰वंस॰ ६२ प्रहारमूर्छापगमे रथस्था यंतॄनुपालभ्य निवर्तिताश्वान् यैः सादिता लक्षितपूर्वकेतूंस्ता
नेव सामर्षतया निजघ्नुः ५४ अप्यर्द्धमार्गे परबाणलूना धनुर्भृतां हस्तवतां पृषत्काः ॥
62 संप्रापुरेवात्मजवानुवृत्त्या पूर्वार्द्धभागैः फलिभिः शरव्यं ५५ आधोरणानां गजसंनिपा
ते शिरांसि चक्रैर्निशितैः क्षुराग्रैः हृतान्यपि श्येननखाग्रकोटिव्यासक्तकेशानि चिरेण
पेतुः ५६ पूर्वं प्रहर्ता न जघान भूयः प्रतिप्रहाराक्षममश्वसादी तुरंगमस्कंधनिषण्ण
देहं प्रत्याश्वसंतं रिपुमाचकांक्षे ५७ तनुत्यजां वर्मभृतां विकोशैर्बृहत्सु दंतेष्वसिभिः
पतद्भिः उद्यंतमग्निं शमयांबभूवुर्गजा विविग्नाः करसीकरेण ५८ शिलीमुखोत्कृ
त्तशिरःफलाढ्या च्युतैः शिरस्त्रैश्चषकोत्तरेव रणक्षितिः शोणितमद्यकुल्या रराज
मृत्योरिव पानभूमिः ५९ उपांतयोर्निष्कुषितं विहंगैराक्षिप्य तेभ्यः पिशितप्रिया

राम ६२

केयूरकोटिक्षततालुदेशा शिवा भुजच्छेदमपाचकार ५० कश्चिद्द्विषत्खड्गहृतोत्तमांगः
सद्योविमानप्रभुतामुपेत्य वामांगसंसक्तसुरांगनः स्वं नृत्यत्कबंधं समरे ददर्श ५१
अन्योन्यसूतोन्मथनादभूतां तावेव सूतौ रथिनौ च कौचित् व्यश्वौ गदाव्यायतसं
प्रहारौ भग्नायुधौ बाहुविमर्दनिष्ठौ ५२ परस्परेण क्षतयोः प्रहर्त्रोरुत्क्रान्तवाय्वोः समका
लमेव अमर्त्यभावेपि कयोश्चिदासीदेकाप्सरःप्रार्थितयोर्विवादः ५३ व्यूहावुभौता
वितरेतरस्मात् भंगं जयं चापतुरव्यवस्थं पश्चात्पुरोमारुतयोः प्रवृद्धौ पर्यायवृत्त्ये
व महार्णवोर्मी ५४ परेण भग्नेपि बले महौजा ययावजः प्रत्यरिसैन्यमेव धूमो निव
र्त्येत समीरणेन यतो हि कक्षस्तत एव वह्निः ५५ रथी निषंगी कवची धनुष्मान् दृप्तः

र.वं.स.
६३

63

सतजन्यकमेकवीरः विलोडयामास महावराहः कल्पक्षयोद्वृत्तमिवार्णवांभः ५६ सद
क्षिणं तूणमुखेन वामं व्यापारयन्हस्तमलक्ष्यताजौ आकर्णकृष्टा सकृदस्य योद्धुर्मौर्वीव
बाणान्सुषुवे रिपुघ्नान् ५७ सरोषदष्टाधरलोहितोष्ठैर्व्यक्तोर्ध्वरेखा भ्रुकुटीर्वहद्भिः
तस्तार गां भल्लनिकृत्तकण्ठैर्हुंकारगर्भैर्द्विषतां शिरोभिः ५८ सर्वैर्बलाङ्गैर्द्विरदप्रधानैः स
र्वायुधैः कंकटभेदिभिश्च सर्वप्रयत्नेन च भूमिपालास्तस्मिन्प्रजह्रुर्युधि सर्व एवा
५९ सोऽस्त्रव्रजैश्छन्नरथः परेषां ध्वजाग्रमात्रेण बभूव लक्ष्यः नीहारमग्नो दिनपूर्वभा
गः किंचित्प्रकाशेन विवस्वतेव ६० प्रियंवदात्प्राप्तमथो प्रियार्हः प्रायुंक्त राजस्वधि
राजसूनुः गांधर्वमस्त्रं कुसुमास्त्रकान्तः प्रस्वापनं स्वप्ननिवृत्तलौल्यः ६१ ॥ श्लो॥

ततो धनुष्कर्षणमूढहस्तमेकांसपर्यस्तशिरस्त्रजालं तस्थौ ध्वजस्तंभनिषण्णदे
हं निद्राविधेयं नरदेवसैन्यं ६२ ततः प्रियोपात्तरसेधरोष्ठे निवेश्य दध्मौ जलजं कुमा
रः तेन स्वहस्तार्जितमेकवीरः पिबन्यशो मूर्त्तमिवाबभासे ६३ शंखस्वनाभि
ज्ञतया निवृत्तास्तं सन्नशत्रुं ददृशुः स्वयोधाः निमीलितानामिव पंकजानां मध्ये
स्फुरंतं प्रतिमाशशांकं ६४ सशोणितैस्तेन शिलीमुखाग्रैर्निक्षेपिताः केतुषु
पार्थिवानां यशो हृतं संप्रति राघवेण न जीवितं वः कृपयेति वर्णाः ६५ स चापको
टीनिहितैकबाहुः शिरस्त्रनिष्कर्षणभिन्नमौलिः ललाटबद्धश्रमवारिबिंदु
र्भीतां प्रियामेत्य वचो बभाषे ६६ इतः परानर्भकहार्यशस्त्रान्वैदर्भि पश्यानुमता मयासि

र॰ वं॰ स॰ एवंविधेनाहवचेष्टितेन त्वं प्रार्थ्यते हस्तगता ममैभिः ६७ तस्याः प्रतिद्वंद्विभवाद्वि
६५
षादात्सद्यो विमुक्तं मुखमावभासे निश्वासबाष्पापगमात्प्रपन्नः प्रसादमात्मीयमि
16
वात्मदर्शः ६८ हृष्टापि सा ह्रीविजिता न साक्षाद्वाग्भिः सखीनां प्रियमभ्यनंदत् स्थ
ली नवांभःपृषताभिवृष्टा मयूरकेकाभिरिवाभ्रवृंदं ६९ इति शिरसि स वामं पा
दमाधाय राज्ञामुदवहदनवद्यां तामवद्यादपेतः रथतुरगरजोभिस्तस्य रूक्षालका
ग्रा समरविजयलक्ष्मीः सैव मूर्त्ता बभूव ७० प्रथमपरिगतार्थस्तं रघुः संनिवृत्तं विज
यिनमभिनंद्य श्लाघ्यजायासमेतं तदुपहितकुटुंबः शांतिमार्गोत्सुकोभून्न हि सति कुलधुर्ये स
र्यवंश्या गृहाय ७१ इति श्रीरघुवंशे महाकाव्ये कविकालिदासविरचिते अजविजयो नाम सप्तमः

श्रीरामः

६५

सहसोद्गमियं व्रजेदिति ग्रचिरोपनतां स मेदिनीं नवपाणिग्रहणां वधूमिव ७ अहमेव मतो महीय
तेरिति सर्वः प्रकृतिष्वचिंतयत् उदधेरिव निम्नगाशतेष्वभवन्नास्य विमाननाक्वचित् ८ नमृ
दोनचसत्यसाम्रउग्रवमानः पृथिवीं र हानिव स उपस्हतमध्यमक्रमो नमयामास नृपाननुद्धरन् ९
ग्रयवीक्ष्य गुणैः प्रतिष्ठितं प्रकृतिष्वात्मजमाभिगामिकैः पदवीं परिणामसेवितां रघुरा
दन्नवनांतगामिनीम् १० गुणवत्सुतरोपितश्रियः परिणामे हि दिलीपवंशजाः पदवीं
तरुवल्कवाससां प्रयताः संयमिनां प्रपेदिरे ११ तमरण्यसमाश्रयोन्मुखं शिरसा
वेष्टनशोभिनासुतः ततसर्थद्रवत्वचंउन प्रतियेदे पवर्जितां श्रियम् १२
स वाह्निः दितिपालवेश्मनो निवसन्नावसथे यतिप्रियः समुपास्यत उत्रभोग्यया
स्नुषेवाविकृतेन्द्रियः श्रिया १४ प्रशमस्थितपूर्वपार्थिवं कुलमभ्युद्यतनूतन
मर्जसत

र॰ वं॰
अ॰ ६६

नभसानिभृतेंदुनातुलामुदितार्केणसमारुरोहतत् १५ यतिपार्थिववेशधारिणौददृशा
तेरघुराघवौजनैः अपवर्गमहोदयार्थयोर्भुवमंशाविवधर्मयोर्गतौ १६ अजिताधि
गमायमंत्रिभिर्युयुजेनीतिविशारदैरजः अनपायिपदोपलब्धयेरघुराप्तैःसमि
याययोगिभिः १७ समदृश्यतभूपतिर्युवासचिवैःशत्रुपदमर्षसिद्धये अपुनर्ज
ननोपपत्तयेप्रवयाःसंयमिभिर्मनीषिभिः १८ अनुरंजयितुंप्रजाःप्रभुर्व्यव
हारासनमाददेनवः अपरःशुचिविष्टरस्थितःपरिचेतुंयततेस्मधारणाः १९
अनयत्प्रभुशक्तिसंपदावशमेकोनृपतीननंतरान् अपरःप्रणिधानयोग्यया [illegible]
यामरुतःपंचशरीरगोचरान् २० नयचक्षुरजोदिदृक्षयापरवंभूस्यततानमंड
ले हृदयेसमरोपयन्मनःपरमंज्योतिरवेक्षितंरघुः २१ अकरो[illegible]दचिरेश्वरः

नः४

राम
६६

द्विषदारंभफलानि भस्मसात् इतरो दहने स्वकर्म्मणां ववृते ज्ञानमयेन वह्निना ।
२२ पणबंधमुखान्गुणानजः षडुपायुंक्त समीक्ष्य तत्फलम् रघुरप्यजय ।
द्गुणत्रयं प्रकृतिस्थं समलोष्टकांचनः २३ न नवः प्रभुराफलोदयात्स्थिरकर्म्मा विर
राम कर्मणः न च योगविधेर्नवेतरः स्थिरधीरापरमार्थदर्शनात् २४ ॥
इति शत्रुषु चेंद्रियेषु च प्रतिषिद्धप्रसरेषु जाग्रतौ प्रसितावुदयापवर्गयोरुभ
यीं सिद्धिमुभाववापतुः २५ अथ काश्चिदजव्यपेक्षया गमयित्वा समदर्श
नः समाः तमसः परमापदव्ययं पुरुषं योगसमाधिना रघुः २६ श्रुतदेह
विसर्जनः पितुश्चिरमश्रूणि विमुच्य राघवः विततान समं पुरोयमाकृतमेते

र[illegible]घु.
प्र. ६७

67

अकरोच्चतदौर्ध्वदेहिकंपितृभक्त्यापितृकार्यकल्पवित् नहितेनपथातनुत्यजस्तन
यावर्जितपिंडकांक्षिणः २८ सपरार्ध्यगतेरशोच्यतांपितुरुद्दिश्यसदर्थवे।
दिभिः शमिताधिरधिज्यकार्मुकः कृतवानप्रतिशासनंजगत् २९ क्षितिरिं
दुमतीचभामिनीपतिमासाद्यतमग्र्यपौरुषं प्रथमाबहुरत्नसूरभूदपरावीर
मजीजनत्सुतम् ३० दशरश्मिशतोपमद्युतिंयशसादिक्षुदशस्वपिश्रुतं दश
पूर्वरथंयमाख्ययादशकंठारिगुरुंविदुर्बुधाः ३१ ऋषिदेवगणस्व[illegible]।
धाभुजांश्रुतयागप्रसवैःसपार्थिवः अनृणत्वमुपेयिवान्बभौपरिधेर्मु।
क्तइवोष्णदीधितिः ३२ बलमार्तभयोपशांतयेविदुषांसन्नतयेबहुश्रुतं वसु

श्रि
ए
म
म

नैकेवलंगणवत्ताविनिरप्रयोजनं ३३ सकदाचिदवेक्षितप्रजः सहदेव्याविजहा
रसुप्रजाः नगरोपवनेशचीसखोमरुतांपालयितेवनंदने ३४ अथरोदसिदक्षि।
णोदधेःश्रितगोकर्णनिकेतमीश्वरम् उपवीणयितुंययौरवेरुदयावृत्तिपथेननार
दः ३५ कुसुमैर्ग्रथितामपार्थिवैःस्रजमातोद्यशिरोनिवेशिताम् अहरत्कि।
लतस्यवेगवानधिवासस्पृहयेवमारुतः ३६ भ्रमरैःकुसुमानुसारिभिःपरिकी।
र्णापरिवादिनीमुनेः ददृशेपवनावलेपजंसृजतीवाष्पमिवांजनाविलं ३७।
अभिभूयविभूतिमार्तवींमधुगंधातिशयेनवीरुधांनृपतेरमरस्रगापसादयितोर
स्तनकोटिसुस्थितिं ३८ क्षणमात्रसखींसुजातयोस्तनयोस्तामवलोक्यविह्वला निमिमील
नरोत्तमप्रियाहृतचंद्रातमसेवकौमुदी ३९

र. वं.
अ. ८ ६२

[illegible] समभ्येद नराधिपेनसा ४९

वपुषा कलसेनाभ्यसिञ्चतो[illegible] संमोहविलुप्तचेतसा अगमत्सह तैलबिंदुनानवदी

पार्श्विरिवदतैलसलम् ५० उभयोः परिपार्श्ववर्तिनां कमलेनातरवेणवीजिताः वि

ह्णाः कमलाकराश्रयाः समडंरवाइवतत्रचुकुशुः ५१ नयतेर्कजनादिभिस्तमो

नुदेस्मात्ज तथैव संस्थिता प्रतिकारविधानमायुषः सति शेषे हि फलाय कल्प

यते ५२ प्रतियोजयितव्यवल्लकी समवस्थामथ सत्वसंप्लवात् सतिनाय

नितांतवत्सलः परिगृह्योचितमंकमंगनाम् ५३ पतिरंकनिषण्णया तया करणापाय

विभिन्नवर्णया समलक्ष्यत विप्रदादिलांछनं गलेखामुषसीव चंद्रमा ५४ विललाप

सबाष्पगद्गदं सहजामप्यपहाय धीरताम् अभितप्तमयोपि मार्दवं भजते कैव कथा शरीरिणाम्

कुसुमान्यपि गात्रसंगमात्प्रभवंत्यायुरपोहितुं यदि न भविष्यति हंत साधनं कि-
मिवान्यत्प्रहरिष्यतो विधेः ४६ अथवा मृदु वस्तु हिंसितुं मृदुनैवारभते प्रजांतकः
हिमसेकविपत्तिरत्र मे नलिनी पूर्वनिदर्शनं गता ४७ अथवा मम भाग्यविप्लवा-
दशनिः कल्पित एष वेधसा यदनेन तरुर्न पातितः क्षपिता तद्विटपाश्रया लता ४८
स्रगियं यदि जीवितापहा हृदये किं निहिता न हंति माम् विषमप्यमृतं क्वचिद्भवेद-
मृतं वा विषमीश्वरेच्छया ४९ कृतवत्यसि नावधीरणामपराद्धेऽपि यदा चिरं मयि
कथमेकपदे निरागसं जनमाभाष्यमिमं न मन्यसे ५० ध्रुवमस्मि शठः शुचिस्मिते

र. वं.
श्र. ६९
68

विदितः कैतववत्सलस्तव परलोकमसंनिवृत्तये यदनापृच्छ्यगतासिमामितः ५१ द
यितांयदितावदन्वगाद्विनिवृत्तंकिमिदंतयाविना सहतांहतजीवितंममप्रब ।
लामात्मकृतांनुवेदनाम् ५२ सुरतश्रमसंभृतोमुखेध्रियतेस्वेदलवोद्गमोपि
ते अथवास्तमितात्वमात्मना धिगिमांदेहभृतामसारताम् ५३ मनसापि
नविप्रियंमयाकृतपूर्वंतवकिंजहासिमाम् ननुशब्दपतिःक्षितेरहंत्वयिमेभावनिबं
धनारतिः ५४ कुसुमोत्खचितान्वलीभृतश्चलयन्भृंगरुचस्तवालकान् ।
करभोरुकरोतिमारुतस्त्वदुपावर्तनशंकिमेमनः ५५ तदपोहितुमर्हसि

प्रतिबोधेनविषादमाशुमे ज्वलितेनगुहागतंतमस्तुहिनाद्रेरिवनक्तमोष
धिः ५६ इदमुच्छ्वसितालकंमुखंतवविश्रांतकथंदुनोतिमां निशिसुप्तमि
वैकपंकजंविरताभ्यंतरषट्पदस्वनम् ५७ शशिनंपुनरेतिशर्वरीदयिता
द्वंद्वचरंपतत्रिणम् इतितौविरहांतरक्षमौकथमत्यंतगतानमांदहः ५८
नवपल्लवसंस्तरेपितेमृदुदूयेतयदंगमर्पितम् तदिदंविषहिष्यतेकथंवदवा
मोरुचिताधिरोहणम् ५९ इयमप्रतिबोधशायिनींरशनात्वांप्रथमा
रहःसखी गतिविभ्रमसादनीरवानशुचानानुमृतेवलक्ष्यते ६०।

र॰वं॰
अ॰८॰

कलमन्यभृतासु भाषितं कलहंसीषु मदालसं गतं पृषतीषु विलोलमीक्षितं
पवनोद्धूतलतासु विभ्रमः ॥६१॥ त्रिदिवोत्सुकयाप्यवेक्ष्य मां निहिताः सत्य
ममी गुणास्त्वया विरहे तव मे गुरुव्यथं हृदयं न त्ववलंबितुं क्षमाः ॥६२॥
मिथुनं परिकल्पितं त्वया सहकारः फलिनी च नन्विमौ अवि
धाय विवाहसत्क्रियामनयोर्गम्यत इत्यसांप्रतम् ॥६३॥ कुसुमं कृतदोहदस्त्व
या यदशोकोयमुदीरयिष्यति अलकाभरणं कथं नु तत्तव नेष्यामि निवापमाल्य
तां ॥६४॥ स्मरतेव सशब्दनूपुरं चरणानुग्रहमन्यदुर्लभम् अमुना कुसुमाश्रुव
र्षिणा त्वमशोकेन सुगात्रि शोच्यसे

नवभिः स्वसितान्तकादिग्रथिताङ्गीवकुलैः सममया अममाप्यविलासमेदुकुलं।
किमिदं नरकेठिहृष्यते ६६ समदुःखसुखः सखीजनः प्रतिपच्चंद्रनिभोय।
मात्मनः अहमेकरससत्थापि ते व्यवसायः प्रतिपत्तिनिष्ठुरः ६७ धृ।
तिरस्तमिता रतिश्च्युता विरतं गेयमृतुर्निरुत्सवः गतमाभरणप्रयोजनं परि
शून्यं शयनीयमद्य मे ६८ गृहिणी सचिवः सखी मिथः प्रियशिष्या ललि
तेकलाविधौ करुणाविमुखेन मृत्युना हरता त्वां वत किं न मे हृतं ६९ युगमं
मदिराक्षि मदाननार्पितं मधु पीत्वा रसवत्कथं नु मे अनुपास्यसि वाष्पदूषितं परलोको

र. वं.
प्र. ७१

विभवेपिसतित्वयाविनासुखमेतावदजस्यगण्यतां अहृतस्यविलोभनान्तरैर्म
मसर्वेविषयास्त्वदाश्रयाः ७१ विलपन्नितिकोसलाधिपःकरुणार्थग्रथि
तंप्रियांप्रति अकरोत्पृथिवीरुहानपिस्रुतशाखारसबाष्पदूषितान् ७२
अथतस्यकथंचिदंकतःस्वजनस्तामपनीयसुंदरीम् विससर्जकृतांत्य
मंडनामनलायागुरुचंदनैधसे ७३ प्रमदामनुसंस्थितःशुचानृपतिः
सन्नितिवाच्यदर्शनात् नचकारशरीरमग्निसात्सहदेव्यानतुजीविताशया
या ७४ अथतेनदशाहतःपरेगुणशेषामुपदिश्यसुंदरीम् विदुषाविधय

ये

राम
७१

महर्द्धयः श्रयवोपवने वितेनिरे ७५ सविविशात्रीं तयाविनावणदायायः

शशांकदर्शनः यदिवाहमिवावलोकयन्नसस्तुचः पौरवयस्त्रवाश्रुः

श्रु ७६ तमवेत्यमखादीक्षितः श्रणिथानाद्भुहराश्रयालयः अभिषं

गिणमीश्वरं विशत्तामितिशिष्यैनकिलान्वोधयत् ७७ असमाप्तवि

धिर्यतोमुनिस्तवविद्वानपितापकारणम् नभवंतमुपास्थितः स्वयं

प्रकृतौस्थापयितंकृतस्थितिः ७८ मयितस्य महत्तवर्तिते लघुसंदेश

पदासरस्वती श्रणविक्ष्कतमेवसारतोहृदिचैनामुपयातुमर्हसि ७९

र.वं.
प्र.८२

72

त्रिषुधामसुशार्ङ्गधन्वनःसमतीतंचभवच्चभाविच सहिनिःप्रति— नचक्ष
षात्रितयंज्ञानमयेनपश्यति ८० चरतःकिलदुश्चरंतपस्तृणविंदोःप
रिशंकितःपुरा प्रजिघायसमाधिभेदिनींहरिरस्मैहरिणींसुरांगना
म् ८१ सतपःप्रतिबंधमन्युनाप्रमुखाविष्कृतचारुदर्शनाम् अश
पद्भवमानुषीतितांशामवेलाप्रलयोर्मिणामुनिः ८२ भगवन्प
रवानयंजनःप्रतिकूलाचरितंक्षमस्वमे इतिचोपनतांक्षितिस्पृशं
कृतवानाहरमाल्यदर्शनात् ८३ क्रथकैशिकवंशसंभवातवभूत्वा
१७

मुनिशापनिवृत्तकारणं स्वजमासाद्य ततस्तनुं जहौ ८४ तदतं तद्दपा
यचिंतयाविपदुत्पत्तिमतामुपस्थिता वस्तुयेयमुपे— तास्त्वयावमम
त्याहिन्नपाः कलत्रिणः ८५ उदयेयदवाच्यमुक्तता स्त्वनमाविः।
कृतमात्मनस्त्वया मनसस्त्वदुपस्थितेज्वरे जनरञ्जीवितयाप्रकाश्य
ताम् ८६ हृदताजनतएवसाधुनर्भवतानानामरत्तानलभ्यते परा
लोकजुषां स्वकर्मभिर्गतयोभिन्न— याहि देहिनाम् ८७ अपा
पीकमनाऊढुं विनीमनुगृह्णीस्वनिवापदत्तिभिः स्वजनाश्रुकि
लातिसंततं नरहन्ति प्रेतमिति प्रचक्षते ८८

र. वं.
प्र. ७३

७३

मरणं प्रकृतिः शरीरिणां विकृतिर्जीवनमुच्यते बुधैः क्षणमप्यवति।
ष्ठते श्वसन्यदि जंतुर्ननु लाभवानसौ ८९ अवगच्छति मूढचेतनः
प्रियनाशं हृदि शल्यमर्पितम् स्थिरधीस्तु तदेव मन्यते कुशलद्वारतया
समुद्धृतम् ९० स्वशरीरशरीरिणावपि श्रुतसंयोगविपर्ययो यदा
विरहः किमिवानुतापयेद्वद बाह्यैर्विषयैर्विपश्चितम् ९१ न पृथ।
ग्जनवच्छुचो वशं वशिनामुत्तम गंतुमर्हसि द्रुमसानुमतां कि।
मंतरं यदि वायौ द्वितयेपि ते चलाः ९२ ॥

मधुरं वा दुरवापसमागमान् ३२ नयगुणोपचितामिव भूपतेः सदुपका
रफलां श्रियमर्थिनः अभिययुः सरसः मधुसंभृतां कमलिनीमलि
नीरपतत्रिणः ३३ कुसुममेव न केवलमार्तवं नवमशोकतरोः स्मरदी
पनं किसलयप्रसवोपि विलासिनां मदयिता दयिताश्रवणार्पितं ३४
विरचिता मधुनोपवनश्रियामभिनवा इव पत्रविशेषकाः मधुलिहां म
धुदानविशारदाः कुरवका रवकारणतां ययुः ३५ दशनचन्द्रिकया
व्यवभासितं हसितमासवगन्धि मधोरिव बकुलमुच्चमसेव्यत षट्पदैः
अचिरसंचितरसंभृतमीयभूमिः ३६ स्वरभिसकुंभमजेवनमालयो यथावयः

मधितायां पवतगं येयस्मिन् एता हृशंमधो हसितं
इव स्थितं = १२

२.वं.न. ७९

79

लाभामेनापायितमंकुरम् ... प्रमदया मदयापितलज्जया

२९ ... वदनासवसंभृतस्तदनुवादिगुणः कुसुमोद्गमः मधुकरैरकरो

न्मधुलोलुपैर्बकुलमाकुलमायतपंक्तिभिः ॥२९॥ [illegible] ध्वजप

टं मदनस्य धनुर्भृतश्छविकरं मुखचूर्णमृतुश्रियः कुसुमकेसररेणुमलि

व्रजाः सपवनोपवनोत्थितमन्वयुः ३२ प्रथममन्यभृताभिरुदीरिताः

प्रविरला इव मुग्धवधूकथाः सुरभिगन्धिषु शुश्रुविरे गिरः कुसुमिता

सु मिता वनराजिषु ३९ तिलकमस्तकहर्म्यकृतास्पदैः कुसुममध्वनु

षंगसुगन्धिभिः कलमगीयत भृंगविलासिभिः स्मरनृपैरनृपैरवा

लासखैः ४० गामयितुं प्रभुरैरैष्वस्खेन मानमहसीवत्तपास्यवधूजनः इति

दयान्वितस्वांभवदायनानुरंजनीरजनीशाननीमयौ ४१ अनुभवन्नवदोल

मृतूत्सवं पटुरपि प्रियकण्ठजिघृक्षया अनयदासनरज्जुपरिग्रहे भुजलतां

जलतामबलाजनः ४२ त्यजत मानमलं बत विग्रहैर्न पुनरेति गतं चतुरं

वयः परभृताभिरितीव निवेदिते स्मरमते रमते स्म वधूजनः ४३ ॥८॥

अनलसान्यभृतानलसान्मनः कमलधूलिभृता मरुतेरिता कुसुमभारनताध्व

गयोषितामसमशोकमशोकलताकरोत् ४४ लघुपतिस्मरनेपथ्यपराधजो

नसहकारतरुस्तरुणोपमितो कुसुमितोनुमितोलिभिरन्वदः स्मरसमायि

र.वं.
न.
८०

कश्चोषितनाम ॥ ४५ ॥ कृतिसहविभ्रमरागवनमीनयः कुसुमकोमलदन्तरुचो बभुः
उपवनान्तलतापवनाहतैर्विमलयैः मलयैरविपाणिभिः ॥ ४६ ॥ अपतथा
रतयाविशदस्वरैः स्मरतरागपरिश्रमनोदिभिः कुसुमचापमतेजयदंशुभिः हिमकरोज्ज्वलके
तने ॥ ४७ ॥ हुताशनदीप्तिवनश्रियः प्रतिनिधि कनकाभरणस्य यत् प्रवतयः कुसुमेटपुरहि
तेतरलकेदलकेशरपेशले ॥ ४८ ॥ अलिभिरञ्जनबिन्दुमनोहरैः कुसुमभा
क्तिनिपातिभिरेकितः नवलशोभयति स्म वनस्थलिं न तिलकस्तिलकः
प्रमदामुख ॥ ४९ ॥ ललितविभ्रमबन्धविचक्षणं सुरभिगन्धपराजितकेसरं
पतिषु निर्विविशुर्मधुमङ्गनाः स्मरसखं रसखण्डनवर्जितं ॥ ५० ॥ शुशुभिरे स्मि

तरान्नाखियं इवृक्षस्य सिंजितमेखला: विकचेतामरसा: ग्रहदीर्घिका: मदकलोदकलोल
विहंगमा: ५१ भ्रमदयन्मधुगंधसनाथया किसलयार्थरमेत तरा ताया उरसेमभारन
तानवमल्लिकास्मितरुचारुविलासिनी ५२ उपययौ तनुतामधुखंडिताहिमकरोदया
पांडुमुखच्छवि: सहशमेमसमागमनिर्वृतिं वनितया नितया रजनीवधू: ५३ अरुणरा
गनिषेविभिरंशुकै: श्रवसमेलयपदेश्वययवातुरै: परम्लेनाविकृतैश्च विलासिन: स्म
रबलैरबलेकरसा: कृता: ५४ ३० चितांवयवाच्चिचिमि: कोरलिकं दवकयोग।
मधुपुपीसहषेकानिरलं ततमेजगौ तिलकजालकजालकमोक्तिकै: ५५
अथयथासुखमार्तवंत्सवमनुभूय विलासवतीसख: नरपति।

नेभयात्रउतिनभयादिस्फुचकनुरमालिन्या
दिरूपंचेष्टितं तस्यबोधनं ज्ञानंकरोतिम्लानादी
नां भयक्रोधौ नाना तीत्यर्थः =२

अवकाल् नि विहारं विस्तु: वसेन: काम: ५६ अभ्यास नेने चवलालनामगवयादयक्षेत्रांपा

उद्यमवर्ती=
प्रहर्षिणावर्ती=२

र·वं·न. स्मकमेमगरतिस्मिमथमन्मथमन्मथसन्निभः ॥५६॥ परिचयं चतुलल

२९ निपातनेनभयरुषोप्सतः दीतवायनेश्रमजयामनृणां चकोरोपसौ तनुसि

81 अस्ला का अनुज्ञातः एणतोनुमितः सचिवैर्यो ॥५७॥ मनावयोगमदनमवेशामूर्द्धि पुत्तकेठ निषिक्तया।

रासनः गगम मं स्वाभिरोहुतरेणुभिन्न सवितासविताननिमीकरोत् ॥५८॥

ग्रथितमोलिरसौ वनमालयानवपल्लाशसवर्णितनुच्छदः नरगवल्ला

नचेचलकुण्डलो विरुरुचेरुरुचे छिनभूमिषु ॥५९॥ नरुलताविनिवेशिता।

विग्रहाभ्रमरसंक्रमतितमहजयः दहस्मरं स्वनिर्जितवनदेवताः सुना

यनंनयनंदिनकोशलं ॥६०॥ स्वगणावाग्रकैः प्रथमाश्रितं व्यपगाता

छ

[दशरथः]
नलदस्तुविविशांसः स्थिरतुरंगमभूमिनिपानवन्मृगवयोगवयोप-
[कः किमिव]
चितं वनं ॥६१॥ अथ नभस्य इव त्रिदशायुधं कनकपिंगतडिद्गुणसंगतं
[दशरथः] [दशरथस्य]
धनुरधिज्यमनाधिरुपाददे नरवरो रवरोषितकेसरी ॥६२॥ तस्य स्तनप्रणा-
यिभिर्मुहुरेणशावैर्व्याहन्यमानहरिणीगमनं पुरस्तात् आविर्बभू-
व कुशगर्भमुखं मृगाणां यूथं तदग्रसरगर्वितकृष्णसारम् ॥६३॥ तत्प्रार्थितं ज-
वनवाजिगतेन राज्ञा तूणीमुखोद्धृतशरेण विशीर्णपंक्ति श्यामीच-
कार वनमाकुलदृष्टिपातैर्वातेरितोत्पलदलप्रकरैरिवार्द्रैः ॥६४॥ लक्ष्यी-
कृतस्य हरिणस्य हरिप्रभावः प्रेक्ष्य स्थितां सहचरीं व्यवधाय देहं आका-

र.वं.न. र्णकृष्टमपिकामितयासधन्वीबाणंकृपामृदुमनाःप्रतिसंजहार ६५॥
८२ तस्यापरेष्वपिमृगेषुशरान्मुमुक्षोःकर्णान्तमेत्यबिभिदेनिबिडोपिमुष्टिः।
82 त्रासातिमात्रचटुलैःस्मरतःसुनेत्रैःप्रौढप्रियानयनविभ्रमचेष्टितानि ६६ उ।
त्तस्थुषःसपदिपल्वलपंकमध्यान्मुस्ताप्ररोहकवलावयवानुकीर्णं जग्रा
हसद्रुतवराहकुलस्यमार्गंसुव्यक्तमार्द्रपदपंक्तिभिरायताभिः ६७ तं।
वाहनादवनतोत्तरकायमीषद्विध्यन्तमुद्धृतसटाःप्रतिहन्तुमीषुः ना
त्मानमस्यविविदुःसहसावराहावृक्षेषुविद्धमिषुभिर्जघनाश्रयेषु ६८
तेनाभिघातरभसस्यविकृष्यपत्रीवन्यस्यनेत्रविवरेमहिषस्यमुक्तः नि

र्भिद्य विग्रहमशोणितलिप्तपुंखः तं पातयां प्रथममास पपात पश्चात् ६१
प्रायो विषाणपरिमोक्षलघूत्तमाङ्गान् खङ्गांश्चकार नृपतिर्निशितैः क्षु
रप्रैः शृङ्गे स दृप्तविनयाधिकृतः परेषामत्युच्छ्रितं न ममृषे न तु दीर्घमा
युः ६२ व्याघ्रानभिरभिमुखोत्पतितान्गुहाभ्यः फुल्ला^ग्रविटपानि सना॥
ववातभग्नान् शिक्षाविशेषलघुहस्ततया निमेषात् तूणीचकार शरपू
रितवक्त्ररन्ध्रान् ६३ निर्घातोग्रैः कुञ्जलीनान् जिघांसुर्ज्यानिर्घोषैः क्षो
भयामास सिंहान् नूनं तेषामभ्यसूयापरोऽभूद्वीर्योदग्रे राजशब्दे मृगेषु ६४
तान्हत्वा गजकुलबद्धतीव्रवैरान् काकुत्स्थः कुटिलनखाग्रलग्नमुक्तान्

२ र.वं.न. आत्मानं रणकृतकर्मणां ह्रियानामानन्दं प्रमतमिव मार्गहितो रमंस्त ७३ ।

८३ चमरान्परितो विवर्तिताश्वः क्वचिदाकर्णविकृष्टभल्लवर्षी नृपतीनि

वतान्त्रगाम शांतिं सितवालव्यजनैर्वियोज्य सद्यः ७४ अपि तुरगस पि

83 मीपादुत्पतन्तं मयूरं न स रुचिरकलापं वाणलक्ष्यीचकार सपदि

गतमनस्कश्चित्रमाल्यानुकीर्णे रतिविगलितबंधे केशपाशे प्रिया ।

याः ७५ तस्य कर्कशविहारसंभवं स्वेदमाननविलग्नजालकं आच म०३

चाम सतुषारशीकरो भिन्नपल्लवपुटो वनानिलः ७६ इति वि ।

स्मृतान्यकरणीयमात्मनः सचिवावलंवितधुरं नराधिपम् ॥॥

परिहृत्तरामनुवन्थसेव्यासृगयाजहारचतुरिवकामिनी ७६ सोलि
नऊहमसवालशय्योज्ज्वलितमहौषधिदीपिकासनाथां नरपतिर
निवाहयंव भवक्वचि– समेत्तपरिहृतवल्लियामां ७८ उषसिसराज
हंस कर्णान्तालेख्यहुपटहध्वनिमिवियत निहुः अरमनमधुरस्वा
नानि श्रावकविहगविकूजितवन्दिमङ्गलानि ७९ ग्रयजान्तकरोग्र
हीनवर्त्माविपिनेयाम्बधैरलक्ष्यमाणः भ्रमयेनमुचामपस्विरमही
नमसंप्रापनदीतुरंगमेण ८० ऊम्भसरणभवः पहुहवैरुस्वचारा।
निनदोम्भसितस्याः तत्रसहितरदवृंहितशाङ्कीमाद्यपातिनमिश्रुंवि

१. र.वं.न. नृपतेः प्रतिषिद्धमेव यत्कृतवान्पंक्तिरथो विलंघ्य तत्। अपथे पदमर्पयन्ति हि श्रु
लो ४ तवन्तोपि रजोनिमीलिताः ॥ ८२ ॥ हा तातेति क्रन्दितमाकर्ण्य विषण्णस्तस्यान्वे
ष्यन्वेतसगूढं प्रभवं स शल्यप्रोतं वीक्ष्य सकुंभं मुनिपुत्रं तापादन्तःशल्यश्
89 चासीत्क्षितिपोपि ॥ ८३ ॥ तेनावतीर्य तुरगात्प्रथितान्वयेन पृष्टान्वयः सजलकुं
भनिषण्णदेहः। तस्मै द्विजेतरतपस्विसुतं स्खलद्भिरात्मानमक्षरपदैः क
थयांबभूव ॥ ८४ ॥ तच्चोदितश्च तमनुद्धृतशल्यमेव पित्रोः सकाशमवसन्नदृ
शोर्निनाय। ताभ्यां तथागतमुपेत्य तमेकपुत्रमज्ञानतः स्व—— चरितं नृपति
र्यशंसत ॥ ८५ ॥ तौ दंपती बहु विलप्य शिशोः प्रहर्त्रा शल्यं निखातमुदहा
रयतामुरस्तः। सोभूत्परासुरथ भूमिपतिं शशाप हस्तार्पितैर्नयनवारि

वृ　　　　　　　　मा
मिवैवर्द्धः ८६ दिष्टान्तमाप्स्यसि भवानपि पुत्रशोकादन्त्ये वयस्यहमिवे
ति तमुक्तवंतं आक्रान्तपूर्वमिव मुक्तविषं भुजंगं प्रोवाच कोशलपतिः प्र
थमापराद्धः ८७ शापोप्यदृष्टतनयाननपद्मशोभे सानुग्रहो भगवता
मयि पातितोयं कृ— दहन्नपि खलु क्षितिमिंधनेद्धो बीजप्ररोहजननीं
ज्वलनः करोति ८८ इत्थंगते गतघृणः किमयं विधत्तां वध्यस्तवेत्यभि
हितो वसुधाधिपेन एधान्हुताशनवतः स मुनिर्ययाचे पुत्रं परासुम
नुगन्तुमनाः सदारः ८९ प्राप्तानुगः सपदि शासनमस्य राजा संपाद्य पातकवि　शासनं
लुप्तधृतिर्निवृत्तः अन्तर्निविष्टपदमात्मविनाशहेतुं शापं दधज्ज्वलनमौर्व
तैः　　　　　　　　मिवाम्बुराशिः

॥ र. वं. न.
८५
इति श्रीरघुवंशे महाकाव्ये कविराज कालिदासकृतौ दशरथ
मृगयावर्णनं नाम नवमः सर्गः ॥९॥ ॥ श्री नारायणाय नमः
पृथिवीं शासितस्तस्य पाकशासनतेजसः किञ्चिदूनमनूनर्द्धेः शर
दामयुतं ययौ। न चोपलेभे पूर्वेषामृणनिर्मोक्षसाधनं सुताभिधानं स ज्योति
स्सद्यः शोकतमोपहम् २ मनोर्वंश्याश्चिरं तस्मिन्ननभिव्यक्तसंततिः नि
मज्य पुनरुत्पन्नो न दः शोण इवाभवत् ३ निष्ठतस्तस्य यावेदसंततेस्सा
चिरंतपः प्राङ्मथादनभिव्यक्तरत्नोत्पत्तिरिवार्णवः ४ ऋश्यश्रृंगा
दयस्तस्य संतः संतानकांक्षिणः आरेभिरे यतात्मानः पुत्रीयामिष्टिमृत्वि

सतथेति विनेतुरुदारमतेः प्रतिगृह्य वचो विससर्ज मुनिं तदलब्धपदं हृदि।
शोकघने प्रतियातमिवान्तिकमस्य गुरोः ९३ तेनाष्टौ परिगमिताः समाः
कथंचिद्बालत्वादवितथसूनृतेन सूनोः सादृश्यप्रतिकृतिदर्शनैः प्रि
यायाः स्वप्नेषु क्षणिकसमागमोत्सवैश्च ९४ तस्य प्रसह्य हृदयं किल शो
कशंकुः प्लक्षप्ररोह इव सौधतलं बिभेद प्राणान्तहेतुमपि तं भिषजामसाध्यं ला
भं प्रियानुगमने त्वरया स मेने ९५ सम्यग्विनीतमथ वर्महरं कुमारमादिश्य रक्ष
णविधौ विधिवत्प्रजानां रोगोपसृष्टतनुदुर्वसतिं मुमुक्षुः प्रायोपवेशनमतिर्नृपतिर्बभू
व ९६ तीर्थे तोयव्यतिकरभवे जह्नुकन्यासरय्वोर्देहत्यागादमरगणनालेख्यमासाद्य
सद्यः पूर्वाकाराधिकतररुचा संगतः कान्तया सौ लीलागारेष्वरमत पुनर्नन्दनाभ्यन्त

र॰वं॰
स॰ ८४

इति श्रीरघुवंशे महाकाव्ये कालिदासकृतौ अष्टमः सर्गः ८

86